५. यज्ञकर्मण्यग्नेः प्रमुखं स्थानं विद्यते। हव्यपदार्थैर्युक्तो व्याप्तिशीलः सोऽग्निः सर्वान् वनताम्।[3] सूर्य इममग्निं तीव्रगतिं विदधाति, विद्युच्च शिल्पकर्मसु युनक्ति।[4] अयमग्निरतितेजस्वी, विद्युद्रूपे मनोवद् वेगवद्भिः प्रापकैर्धातुभिर्युक्तः सूर्यरूपे च विलक्षणो विख्यातश्चास्ति। विद्वांसस्त्रयस्त्रिंशद्भूम्यादिदेवास्तस्याग्नेऽ भक्षणीयान् हवनीयांश्च पदार्थान् प्राप्नुवन्ति।[5] भावार्थोऽयं यदग्नेस्त्रीणि रूपाणि सन्ति—१. अतिसूक्ष्मं कारणरूपम् २. सूक्ष्मं मूर्तद्रव्येषु व्यापि रूपम् ३. स्थूलं सूर्यादिकञ्च रूपम्। एतेषां रूपाणां गुणकर्मस्वभावान् विज्ञायैतेषां प्रयोगो विधातव्यः।[6] मानवेन ग्राह्यो विद्युद्रूपोऽग्निर्यज्ञं च संगं च साध्नोति। क्रियाभिः सिद्धो व्यापक उद्यमी चायमश्व इवास्ति। धूमं निःसारयन् स बहुशब्दं न कुर्यात्, पाकस्थाल्या वाष्पेण पच्यमानं पदार्थं बहिर्न

---

१. य. २५।४४ २. य. २२।३३ ३. ऋ. १।१६२।२२ ४. ऋ. १।१६३।२
५. ऋ. १।१६३।६ ६. तत्रैव भावार्थः

निर्गमयेत्। भावार्थोऽयं यदाग्निनाश्वैश्च यानानि चाल्यन्ते, अग्नौ हवनादिकर्मभिश्च रोगा न पीडयन्ति।[७] अग्निर्नियमनशीलोऽन्तरिक्षे सूर्यरूपः, सर्वत्रोपलब्धो गूढया शक्त्या प्रक्रियया वोत्तमान् व्यवहारान् सम्पादयति। चन्द्रमस्योषधिष्वप्ययमस्ति, परं तत्रायं स्वकीयेन दाहकेनोष्णेन वा रूपेण गुणेन वा न भूत्वा शीतलरूपेण विद्यते। पृथिव्यामन्तरिक्षे सूर्ये च तस्य त्रीणि बन्धनानि रूपाणि वा सन्ति।[८] आच्छादनादिभिर्दानैश्च युक्तो, यज्ञादिकस्य प्राप्तानां पदार्थानां च विभाजको विद्युद्रूपोऽग्निः कलागृहेषु प्रयोगेण विद्वद्भिः प्रयुक्तान् प्रकाशमयमनोहरपदार्थान् प्रदाय मानवान् श्रीमन्तो विदधाति। अतोऽस्य विद्युद्रूपे प्रयोगाय वृद्ध्यै च सुखप्रापकं ज्ञानं सर्वैः प्राप्तव्यम्।[९] अत्र विद्युद्ग्राहका उष्णशीतौ धातुतारौ विद्युद्रूपस्याग्नेराच्छादने भवतः। कलायन्त्रेषु त्वग्निं प्रयोज्य विमानादियानानि त्वरितगत्या चाल्यन्ते।[१०]

६. अग्नेः प्रयोगेण गमनशीलानि विमानादियानानि मानवानां च शरीराणि च चेतांसि च यात्रोन्मुखानि भूत्वा वनेषु पर्वतेषु च विचरन्ति। विद्युदग्न्योः प्रयोगेण निर्मितानि संचालितानि च यानानि सर्वत्र गतिं कुर्वन्तीतिभावार्थः।[११] देदीप्यमानः कारणरूपेणाजन्मा, वेगवान् गतिजनकश्चाग्निर्विद्वद्भिर्मनोयोगेन कलागृहेषु यथोचितं प्रयुज्यमानः सन्निष्टसाधको भवति। शब्दविद्याविदो [ध्वनिविज्ञानवेत्तारो वा] अस्य ज्ञानप्रयोगौ प्रशंसन्ति कामयन्ते च। भावार्थोऽयं यद् विविधशिल्पविद्याभिस्ताडनादिभिरेवाग्निः पदार्थकार्याणि साध्नोति।[१२]

७. विद्युत् खल्वनेकव्यवहारान् पदार्थांश्च साध्नोति, शिल्पकर्मसु चाग्निमपि युनक्ति—समर्थं विदधाति।[१३] प्रकाशमानायाः पृथिव्यादिषु व्याप्ताया वेगवत्याः शीघ्रगामिन्या विद्युतश्चतुस्त्रिंशत् तिरश्चो गतीरुद्भाव्य मर्मस्थलेष्वनुकूलं शब्दमुत्पाद्य केनापि भ्रंशेन विनोत्तमकर्मसु योजयेरन्। भावार्थोऽयं यद् विद्युत उत्पत्तेः कारणं पृथिव्यादौ व्याप्तमस्ति। तद्विज्ञाय सावधानतया भ्रंशं विनैव विद्युतः प्रयोगः कार्यसाधको भवति। विद्यया क्रियया च सिद्धं विद्यु-

७. ऋ. १।१६२।१५ ८. ऋ. १।१६३।३ ९. ऋ. १।१६२।१६
१०. ऋ. १।१६२।१७ भावार्थः ११. ऋ. १।१६३।११ १२. ऋ. १।१६३।१२
१३. ऋ. १।१६३।२। अत्राग्नेः प्रयोक्ता मानवोऽभीष्टः प्रतिभाति। यद्येवं तर्हि इन्द्रस्यार्थोऽपि शिल्पिप्रभृतय इत्यभीष्टो भविष्यति।

द्रूपमग्निं वसन्तादय ऋतवो विभिन्नेषु योजयन्ति । तस्याग्नेश्च द्वौ नियन्तारौ— [उष्णशीतरूपौ] भवतः । भावार्थोऽयं यत्सर्वेषां पदार्थानां विच्छेदकस्य ऋत्वनुसारं प्राप्तेषु पदार्थेषु व्याप्तस्याग्नेर्द्वौ कालसृष्टिक्रमौ नियन्तारौ भवतः । अस्याग्नेः प्रशंसितगुणान् विज्ञाय स्थूलकाष्ठादिपदार्थानग्नौ प्रक्षिप्य च जनैः शिल्पिभिर्भवितव्यम् ।[१४] विद्युद्वायुना पृथिव्या जलेभ्य आकाशाच्चोत्पाद्यते । इयं सर्वोपरि सर्वश्रेष्ठो वर्तते । सूर्यरूपेण चेयं वायुं सूक्ष्मं करोति । भावार्थोऽयं यद् विद्यया पदार्थरचनां सृष्टिविद्यां च जानीयुः ।[१५]

८. सूर्यः खल्वन्तरिक्षात् पूर्णात् कारणाद् ब्रह्मणश्चाविर्भवति । उद्यन्नेव स शब्दं करोति, श्येनस्य पक्षाविव, हरिणस्य बाधकौ बाहू इव महतः कार्यस्य साधकस्याग्नेरूत्पादकोऽस्ति ।[१६] अयं सूर्य एवाग्निं तीव्रगतिं विदधाति ।[१७]

वायुः

९. वायुः पृथिव्या धारकस्य सूर्यस्य किरणानां गतिं गृह्णाति । अनेन पृथिव्यादिभ्य उत्पादिता विद्युत् सूर्यरूपेण वायुं सूक्ष्मं करोति ।[१८] वायुर्नियन्ता पृथिव्या धारकश्चास्ति ।[१९] वाय्वग्नि जलादयः स्वस्वस्थाने प्रसिद्धाः [स्व-स्वपरिधौ कार्यसाधका इति भावः], कम्पनशीलाः कलायन्त्रस्य संचालकरूपे प्रकाशमाना दिव्यगुणकर्मस्वभाववन्तो निरन्तरं शीघ्रं च गतिं कुर्वाणा अन्तरिक्षस्थमार्गेषु च व्याप्ताः सन्ति । हिन्दीभावार्थोऽयं यद् बहुकोष्ठयुक्तानि कलायन्त्राणि 'सिलिंक'—पदेनाभिधीयन्ते । तत्र विद्युतमुत्पाद्य प्रयोज्य च जना लक्ष्मीपतयः स्युः ।[२०]

सर्वेषां त्रीणि स्वरूपाणि

१०. जलवाय्वग्निपृथिव्यन्तरिक्षाणां सर्वेषामुत्पन्नानां च प्राणिनां पदार्थानां च त्रीणि त्रीणि कारणसूक्ष्मस्थूलस्वरूपाणि तथैव भवन्ति यथाग्नेः ।[२१]

होमः

११. सुगन्धिपदार्थानां होमेन सर्वेषां हितं भवति ।[२२] ये हवनं कुर्वन्ति

---

१४. ऋ. १।१६२।१६ १५. य. २६।१३

१६. ऋ १।१६३।१। अस्योपमाद्वयस्य संगतिर्विचारणीया प्रतिभाति] १७. ऋ. १।१६३।२

१८. य. २६।१३ १९. ऋ. १।१६३।२ २०. ऋ. १।१६३।१०

२१. ऋ. १।१६३।४ भावार्थः २२. य. २५।१३ भावार्थः । [ऋ. १।१६२।१०]

ते रोगैः कष्टैश्च न पीड्यन्ते ।[२३] बुद्धिमन्तो जनाः स्वकीयेन सम्पादितेनोत्तमेन यज्ञेन वर्षाया माध्यमेन नदीषु जलमापूरयन्ति ।[२४] यज्ञकर्तुर्हस्तयोर्नखेषु च लग्नं हविरादिकं विद्वांसोऽपि लभेरन् ।[२५] होतुश्च यज्ञदाने कुर्वाणस्य च मेघस्य ग्रहीतुश्च प्रशंसकस्य चाध्वर्योश्च यज्ञकर्मणा यथा नदीषु जलमापूर्यते एवमेव सर्वे मनुष्या यज्ञकर्म सम्पादयेयुः ।[२६]

अश्वः

१२. प्रकाशमन्तो गतिशीला वेगवन्तोऽश्वा हिंसकेषु युद्धेष्वपि विजयिनो भवन्ति । अतो बुद्धिमन्तो जना एतादृशानामश्वानामनुकूलमाचरन्ति, तेषां सुशिक्षां च विदधति ।[२७] संग्रामादिषु वेगवन्तो दिव्यगुणयुक्ता विद्वद्भिः सुशिक्षिताः सर्वैः प्रशंसिता अश्वा ग्राह्या भवन्ति ।[२८] अश्वस्य शरीरे विद्यमानं मलं, मक्षिकादीनां दंशान् । अन्यानि च कष्टान्यपोह्य तत्र दिव्यगुणा आधातव्याः ।[२९] अश्वादीनग्न्यादिभ्यो रक्षेयुः । कोऽपि तेषां मांसं न खादेत् ।[३०] अश्वादीन् ऋत्वनुकूलसेवादिना पोषयेत्, तेषां मांसस्य पाचकांश्च धिक्कुर्यात् ।[३१] शिक्षकोऽश्वानां विभिन्ना गतीर्बहिर्गमनम्, उपवेशनं, चालनम्, आवर्तनं, बन्धनम्, आच्छदनं, घासादेर्भक्षणं, जलादेः पानं च सम्यग् विदधीत ।[३२] अश्वानां बन्धनाय स्तम्भतक्षणं भक्षणाय चोत्तमपाककर्म कुर्यात् ।[३३] यथा स्रुचा यज्ञेषु पदार्था हूयन्ते तथैव कशादिभिरश्वानां सुशिक्षा सम्पाद्यते ।[३४] अश्वादीन् सुष्ठु साधयित्वा तेषां बलस्य सम्यग् उपयोगः कर्तव्यः ।[३५] अश्वादीनां पशूनां साधयितारो ज्ञातव्याः—प्रशंसितव्या भवन्ति ।[३६] अश्वानां स्नानादिशुद्धिक्रियाभिः शफेष्वयसो निर्मितानां नालानां योजनेनोपद्रवेभ्यो रक्षकानां रशनादीनां प्रयोगेण च रक्षां शिक्षां च विधाय

---

२३. ऋ. १।१६२।१५ २४. ऋ. १।१६२।५ २५. य. २५।३२।

२६. य. २५।२८। अत्र विविधानामृत्विजां नाम्नां व्याख्यानमप्यस्ति । । [ऋ १।१७२।६]

२७. य. २६।२३। [ऋ. १।१६३।१२] २८. ऋ. १।१६२।१

२९. ऋ १।१६२।६। अत्र पदार्थं सुसंगतो नास्ति । भावार्थमनुसृत्यायं सारोऽत्र प्रस्तः । अत्र 'तं देवेष्वप्यस्ति' इत्यस्य 'भवद्भिर्दिव्यगुणेषु परिवर्तनीयाः', शमितुर्हस्तयोर्नखेष्वस्ति' इत्यस्य अश्वं वशीकृत्य शिक्षकस्य हस्तयोः [हन्तो हन्तेः । नि. २।७] चेष्टासु विद्यमाना पीडा [न नास्ति खं सुखं यत्र] इत्यर्थौ भविष्यतः । ३० । य. २५।३७;३२ । [ऋ. १।१६२।१५]

३१. य. २५।३६ ३२. ऋ. १।१६२।१४ ३३. य. २५।२९ ; ऋ. १।१६२।६

३४. य. २५।४० ३५. य. २५।३५। [ऋ. १।१६२।२] ३६. य. २५।३७

तेभ्योऽश्वेभ्यः समुचितं लाभं गृह्णीयात् ।[३७] वेगवताश्वेन सह प्रथमं सर्वेषु दिव्यगुणेषूत्तमं पुष्टिरूपं छागं प्राप्नुयुः । भावार्थे कथितमस्ति यदश्वानां पुष्ट्यै अजाया दुग्धं पाययेयुः ।[३८] अश्वादीन् समुचितेन पानभोजनादिना विहारेण च पोषयित्वा तेभ्यो यथोचितं कार्यं गृह्णीयुः ।[३९] अश्वान् वशीकर्तुं प्रयुक्तं यद् रशनादि घासं च तत्सर्वं प्रभूतमात्रायां स्यात् । एतान् सर्वान् पदार्थान् विद्वांसोऽपि प्राप्नुयुः । भावार्थे कथितमस्ति यदश्वान् सुशिक्षितान् सुनियन्त्रितान् उत्तमाभूषणैश्चालंकृतान् पुष्टांश्च कृत्वा यथोचितानि कार्याणि साध्नुयुः ।[४०] अश्वान् सुष्ठु शिक्षयित्वा तेषां विविधाभिर्गतिभिः सविशेषं लाभं गृह्णीयुः । नीरोगताप्रदचिकित्सका इव पशून् रक्षन्तस्तान् वर्धापयेयुः ।[४१] अश्वादिभिः सहाजादीनां वृद्धिं विधाय लोकहितं विधातव्यम् ।[४२]

यानरचना

१३. यथर्तुग्राह्यपदार्थेषूत्तमा विद्यायात्रासाधकाः सर्वत्र त्रिवारं स्वीकार्या अश्वा अस्मिञ्जगति च दिव्यगुणानां पोषकान् प्रामुख्येन स्वगुणानां प्रकाशकान् प्राप्तव्यान् संगन्तव्यांश्च व्यवहारान् प्राप्ताश्छागाश्चैते सर्वे सत्कर्तव्याः सन्ति । भावार्थे विहितमस्ति यत्सर्वेष्वृतुषु सुखसाधकानि यानानि रचयित्वाश्वादि-पशूंश्च संवर्ध्य लोकहितस्य साधका जनाः शारीरिकाणि मानसिकानि वाचि-कानि च सुखानि प्राप्नुवन्ति ।[४३] विज्ञानेन रचितेषु, धूलिरहिते निर्मल आकाशमार्गे गतिशीलेषु, पक्षिवदुत्पतत्सु, दूराच्छिरोवद् दृश्यमानेषु विमानेषु यात्रां कुर्युर्यतो विमानं सर्वोच्चं [सर्वश्रेष्ठं] यानमस्ति ।[४४] विमानचालने समर्था जना अग्निना चालितानि यानान्यन्तरिक्षे चालयेयुः ।[४५]

अध्यापकाः ; विद्वांसः

१४. अध्यापका विद्यार्थिनः श्रेष्ठाः क्रियाः शिक्षयन्ति, विद्याग्नौ चाविद्या-भ्रमान् हुत्वा तेषामात्मानं शोधयन्ति ।[४६] वायोरिव शब्दकारिणोऽश्ववद् वेगशालिनो विदुषो बाहू अतिबलिष्ठौ भवतः ।[४७] विदुषां त्रीणि बन्धनानि

---

३७. य. २९।१९। [ऋ. १।१६३।५] ३८. ऋ. १।१६३।१२ ३९. य. २५।३८ ; ३९

४०. ऋ. १।१६२।८ ; य. २५।३१ ४१. य. २५।४१

४२. य २५।२६ भावार्थः [ऋ. १।१६२।३] ; ऋ. १।१६२।४ भावार्थः ।

४३. ऋ. १।१६२।४ ४४. य. २९।१७ ४५. ऋ. १।१६३।६ भावार्थः

४६. य. २५।४२। भावोऽयं वाचकलुप्तोपमां परिकल्प्य प्राप्तोऽस्ति ।

४७. य. २९।१२। [ऋ. १।१६३।१]

—विद्यायां प्राणेष्वन्तरिक्षे च भवन्ति। विदुषां सत्कारस्तु श्रेष्ठविदुषामुत्तमं जन्माभिधीयते। भावार्थोऽयं यज्वना विद्यास्वात्मना मनसा शरीरेण च दत्त-चित्ताः स्युः।[४८] विद्वांसो यज्ञस्य साधका अहिंसिताः सुरक्षिताः स्थातुकामाः सुगम्या अग्निं प्रकाशयन्तः प्रशंसिताः प्रशंसकाः सौम्या बुद्धिमन्तो जना उत्तमं यज्ञं विधाय नदीर्जलेनापूरयन्ति।[४९] विज्ञानेनाशाभिश्च संयुक्ताः, सुमतयः, सिद्धान्तिनो वेदार्थज्ञातारो धीरबुद्धिभिर्जनैरनुमोदिताः सुसहाया जनाः शास्त्र-सिद्धान्तेषु निष्णातानां विदुषां मतानां पुष्टिं कुर्वन्तु। भावार्थस्त्वयं यद् विद्वद्भिः प्रतिपादितस्य वितानस्य धारणेन शरीरस्यात्मनश्च पुष्टिर्जायते।[५०] अश्वादीनां प्रयोगाय रशनादीनि यानि वस्तूनि समीहितानि, तानि सर्वाणि वस्तूनि विद्वांसोऽपि प्राप्नुयुः। अत्र विद्वांसोऽश्वानां शिक्षका अभीष्टाः प्रति-भान्ति यैः पर्याप्तमात्रायामश्वादीनां संयमनाय रशनादीनि वस्तूनि प्राप्तव्यानि भवन्ति। नो चेत्, तेऽश्वादीनां सुशिक्षां कर्तुमसमर्था भविष्यन्ति। अन्ये विद्वांसोऽपि यथायोग्यं स्वदायित्वस्य निर्वाहायावश्यकानि वस्तूनि प्राप्नुयुरिति भावोऽपि ध्वन्यते।[५१] बुधानां व्यापकोत्तमव्यवहारेषु वर्तमाना विज्ञानेन व्यवहारेण च पुष्टा बलवन्तश्च मन्त्रार्थविदो धीरबुद्धयः पुरुषा आनन्दं लभन्ते। भावार्थोऽयम्—ऋषित्वमाप्ता जनाः सर्वेभ्यो विज्ञानं वितीर्य तान् पुष्णन्ति, पारस्परिकीमुन्नतिं च विधाय पूर्वकामा जगद्धितैषिणश्च जायन्ते।[५२]

वैद्याः

१५. ज्वरादिरोगैः पीडितानां शरीराणां चिकित्सायै वैद्या उप-गन्तव्याः।[५३] वैद्या अप्युदरस्थं मलिनं मलमर्धपक्वानां पदार्थानां दुर्गन्धेन सह निःसारयेयुः सुपाच्यं भोजनं च पाचयेयुः।[५४]

परोपकारः

१६. यस्य येन-येन सह यावान्-यावान् सम्बन्धः स्यात्, तं सम्बन्धं सर्वे जनाः सम्यग् जानीयुः।[५५] यस्य धनं नित्यशुद्धं स्यात्, तस्मात् प्राप्तस्य दानस्य प्रशंसका, अज्ञानिनो मार्गस्थान् विधातारः, पूर्णविद्वांसं ऐश्वर्यवतां पुष्टिमतां

४८. य. २६।१५। [ऋ. १।१६३।४] ऋ. १।१६२।५ ५०. ऋ. १।१६२।७
५१. ऋ. १।१६२।८ ५२. य. २५।३०
५३. य. २५।३४। अस्य भावार्थस्यालोके पदार्थः परिवर्तनमपेक्षते। ५४. य. २५।३३

च प्राणिनां मनोहरं जलं [दानादिकमिति भावः] प्राप्य सुखान्यनुभवन्ति । भावार्थोऽयं यन्न्यायेन संचितेन धनेन धर्मकार्यं कुर्वाणा जनाः परोपकारिणो भवन्ति ।[५६] सर्वे मानवाः परस्परं सर्वकार्यादिकस्य निष्पादकाः सन्त आत्मानं पालनं पतनं [गतिविकासप्रगत्यादीनीत्यर्थः] सेवनं च प्रत्यक्षम् अनुभवेयुः । [५७] पृथिव्यादीनां विद्यया लौकिकसुखसमृद्धी प्राप्य राज्यस्य विकासेन च निष्पापाः सुखिनश्च भूत्वान्यानपि तादृशानेव विदध्युः ।[५८] लोकहितसाधका जना देह-मनोवचसां सुखानि लभन्ते ।[५९]

राजा

१७. अखण्डितो जनः खल्वस्माकं निष्पापं राज्यमाप्नुयात् ।[६०] स एव जनो राजा भवितुमर्हति यो ज्ञानिन उत्तमं स्थानं, मातापितरौ [रक्षा-निर्माणशक्ती इत्यभिप्रायः ?], विदुषश्च कामयेत, दानिभ्यश्च यथोचितां सामग्रीं प्रापयेत् । न्यायविनयाभ्यां परोपकारिणो मातापितरौ कामयमाना विदुषां च सेवका राज्यस्य शासने समर्था भवन्तीति भावार्थः ।[६१] नृपा अग्न्यादिपदार्थानां ज्ञातारः, प्रीत्या राज्यकार्याणां साधकाः सत्कार्याणां सत्कर्तारो दुष्टानां च दण्डकाः स्युः ।[६२] तेजस्विन ऐश्वर्यशालिनो विमानादीनां प्रयोक्तारः, [प्रजासु] वितरणाय स्वभोगाय चान्नानां वर्धका राज्ञः सभासदोऽपि नृपस्यानुकूल-माचरेयुः ।[६३] शासको विद्वद्भ्यो बलपराक्रमशालिनस्तादृशान् बुधान् अव-चिनुयाद् ये मित्राण्यनुकूला विमानादियानानां प्रयोक्तारश्च भवेयुः । अनेन सर्वेषु मनुष्येषु च पश्वादिसमस्तप्राणिषु च परस्परम् आनुकूल्यं स्थास्यति ।[६४] त एव राज्यस्योन्नतौ समर्था भवन्ति सुखिनश्च जायन्ते य उत्तमपशुधनस्य स्वामिनो बलशालिनः पुरुषार्थिनो विद्वांसः पोषकधनसम्पन्ना अपराधभावना-विहीना भूस्वामिनो व्याप्तिशीलाश्च भवन्ति ।[६५] ते निष्पापाः सुखिनश्च भवेयुर्ये पृथिव्यादिकस्य विद्यया सुखं समृद्धिं च प्राप्य राज्यस्य विकासं कुर्वन्ति ।[६६]

---

५५. य. २६।१५। [ऋ. १।१६३।४] ५६. ऋ. ४।१६२।२ ५७. ऋ. १।१६३।६
५८. ऋ. १।१६२।२२ भावार्थः ५९. ऋ. १।१६२।४ ६०. ऋ. १।१६२।२२
६१. य. २९।२४। [ऋ. १।१६३।१३] ६२. य. २९।२० भावार्थः । [ऋ. १।१६३।९]
६३. य. २९।२०। [ऋ. १।१६३।३] ६४. य. २९।१९। [ऋ. १।१६३।८]
६५. य. २५।४५। अत्र भावार्थे जितेन्द्रियादि-विशेषणानामाधारः 'पुंस' इति पदं प्रतिभाति ।
६६. ऋ. १।१६२।२२ भावार्थः

वीराः

१८. शत्रूणां विजेतारः कृषिकर्मणाऽन्नानामुत्पादका अन्नानामोषधीनां च भोक्तारो [वीरपुरुषा] विविधान् भोगानाप्नुयुः ।[६७] अस्त्रादिभिः सन्नद्धाः स्व-स्वपरिधौ वर्तमाना युद्धविद्यायां सुशिक्षिताः सततगतिशीलाश्वाढ्याश्च जना विजयन्ते ।[६८] वीरभृत्याः सेनाश्च तीव्रगामिनो भूत्वा शत्रून् पराभवन्ति ।[६९] वेगशालिनोऽश्वाः श्येना इव वीरपुरुषाः शत्रूणामवरोधे दृढाः प्रगल्भाश्च भवेयुः ।[७०] कुशला विद्वांसो योधाः क्रोधेनाविष्टाः सन्तोऽपि शस्त्राण्येवं चालयेयुर्यथा तानि दिव्यगुणान् शत्रून् एव विध्येयुरितस्ततो व्यर्था न भवेयुः ।[७१]

१९. न्यायाधीशाः गुप्तस्वभावा ज्ञानकर्मोपासनासु रता नियमकर्तारो विद्यावन्त ऐश्वर्यशालिन ऋषिदेवपितॄणामृणानामपनयने च व्यापृताः स्युः । भावार्थोऽयं यन्न्यायाधीशः सूर्यचन्द्रमसोर्गुणैर्युक्तः, परस्परं च शरीरस्य मनसो वाण्याश्चाकर्षणेन सर्वान् प्रेमसूत्रबद्धान् विदधीरन् ।[७२]

सुखप्राप्तिः

२०. स जनोऽत्यन्तं सुखमाप्नोति यो विदुषो दिव्यगुणभोगानग्न्यादिपदार्थान्, [निवासाय कार्याय च] उत्तमानि स्थानानि, मातापितरावध्यापकान्, दानाय कमनीयानि सुखानि, गम्याः प्रियाः स्त्रियः कामयमानस्तत्प्राप्त्यर्थं प्रयतते ।[७३] मानवोऽग्निगुणेन दुग्धादिगव्यपदार्थैरायुष्यम् अश्वशक्तिसम्पन्नं च जीवनं, पुरुषत्वयुक्तान् पुत्रान्, सर्वेषां च पोषकं धनमाप्नुयात् । अखण्डितो जनश्चास्माकं निष्पापं राज्यं लभेत । भावार्थोऽयं यत्पृथिव्यादीनां विद्यया लौकिकसुखसमृद्धी प्राप्येते ।[७४]

२१. मृत्युकाले मानवानामात्मा तान्न पीडयेत् । विद्युत्तेषां शरीराणि न नाशयेत् । लुब्धा जनाश्च शस्त्रैः कस्यापि शरीरस्याङ्गानीन्द्रियाणि च न कृन्तेयुः । भावार्थमतेन योगाभ्यासं कुर्वन् जनो मृत्युना जीवने रोगैश्च पीडितो न जायते ।[७५]

---

६७. य. २९।१८। [ऋ. १।१६३।९]
६८. य २९।२१। [ऋ. १।१६३।१०]   ६९. य. २९।२२। [ऋ. १।१६३।११]
७०. य. २९।१२ भावार्थः   ७१. ऋ. १।१६२।११। [य. २५।२४]
७२. य. २९।२४। [ऋ. १।१६३।३]   ७३. ऋ. १।१६३।१३   ७४. ऋ. १।१६२।२२
७५. ऋ. १।१६२।२०

प्रशस्या जनाः

२२. अन्तरीक्षाद् ब्रह्माणश्चोद्यन् सूर्यो यथा शब्दमुत्पादयति तथैव ब्रह्मचर्याश्रमात् प्रत्यावर्तमानस्य ब्रह्मचारिणः प्रथमं व्याख्यानं विकासगत्याधायकं बाधानिवारकं च भवति।[७६] सततं गतिशील उद्यमी पुरुषो विमानादिरथान्, अनुकूलसेवकादिजनान्, ऐश्वर्यं, सत्याचरणैर्विद्वद्भिः प्रशंसितां शक्तिं पराक्रमं, तेषां विदुषां च मैत्रीं सदैव प्राप्नोति। भावार्थमतेन येऽध्यापकोपदेशकावनु ज्ञानं विदुषां मैत्रीं च लभन्ते, ते सत्याचारा वीर्यवन्तश्च जायन्ते।[७७] दानेन युक्तैर्यज्ञैरग्नेः कलागृहेषु प्रयोगेण बुधैः प्रयुक्तानां प्रकाशमयमनोहरपदार्थानां प्राप्त्या च मानवः श्रीमान् भवति।[७८] सर्वेषु विद्वत्सूत्तमः पोषकैः सेवनीयो मनोहरपुरोडाशस्य प्रापकेणाश्वेन सह प्राप्तः पदार्थान् सूक्ष्मान् कुर्वाणो जनः कीर्त्यै पुरोडाशं यज्ञभागं लभते।[७९] अश्वानां सुशिक्षका अग्न्यादिपदार्थानां साधका, ऐश्वर्यशालिनो जना जगतो हितैषिणो भवन्ति।[८०] येऽन्यैः प्रदत्तान्यन्येभ्यश्च गृहीतानि वस्तूनि प्रत्यावर्तयन्ते, उत्तममन्नं धनं च लभन्ते, ते सर्वम् आनन्दं भजन्ते भावार्थोऽयं यत्सुकर्मसु धनव्ययं कुर्वन्ती जना आप्तकामा जायन्ते।[८१] यो ह्यृत्वनुकूलं होमयोग्यं दिव्यगुणविद्वत्प्रापकं शीघ्रगामिनं प्राणिनं त्रिः सर्वतो नयति, यश्च जगत्यस्मिन् सेवनीयविद्वत्सत्कारं ज्ञापयमानोऽजः स्यात् ते सदैव रक्षामह्नन्ति।[८२] येषां मनांस्यात्मानश्च कर्मसु व्यापृतानि, धारणाकर्षणसेचकजलगुणानि वेगवन्ति योगरतानि स्युः, ते जना न म्रियन्ते, न कमपि घ्नन्ति, सुखप्रदैर् मार्गैरुपायैर्वा विदुषो दिव्यपदार्थान् च प्राप्नुवन्ति। भावार्थमतेन योगाभ्यासेन समाहितचित्ता दिव्ययोगिभिः सम्पर्कं प्राप्य धर्म्यं मार्गं सेवमानाः परमात्मनि स्वात्मानं युक्त्वा मोक्षं लभन्ते।[८३]

कर्म—तत्पद्धतिस्तत्साधकाश्च

२३. यथा यज्ञेषु स्रुचा हविः प्रदीयते, कशया चाश्वः प्रेर्यते, तथैव महता

---

७६. ऋ. १।१६३।१ बाधानां निवारकमिति भावो 'बाहू' इति पदस्यास्ति।

७७. ऋ. १।१६३।८ ७८. ऋ. १।१६२।१६ ७९. य. २५।२६। [ऋ. १।१६२।३]

८०. य. २९।२३। [ऋ. १।१६३।१२] ८१. य. २५।२५। [ऋ. १।२६२।२]

८२. य. २५।२७। अत्र 'अजः = छागः' इति भाष्यकारः। परन्तु 'अजः = गतिशीलो जनः [अज् धातोः] इति भावोऽत्र संगच्छते। ८३. ऋ. १।१६२।२२

बलेन निष्पादितव्येषु ज्ञानकर्मादिषु मानवा विद्वांसश्च घने न्ति।[84] भावार्थमतेन यथा कशादिभिरश्वादीन् गमयन्ति 'तथैव क प्रचाल्य विमानादियानानि शीघ्रं गमयेयुः'।[85] मानवानां नश्वराणि राण्यन्तः करणवृत्तयः शीघ्रमेव दूरस्थविषयाणामवबोधने समर्था बुद्धयो, वनेष्वपि धारकाः पोषकाश्च सेनावयवाः सर्वाणि कार्याणि साध्नुवन्ति। भावार्थोऽयं यदनित्यैः शरीरैर्नित्यानि कर्माणि साध्नुवन्तो जना अतुलं सुखं लभन्ते। वीरभृत्याः सेनाश्च तीव्रगामिनो भूत्वा शत्रून् विजयन्ते।[86]

शरीरादिरक्षा

२४. शरीराणां च संघातानां चाङ्गानि सर्वेष्वृतुषु यथोचितकर्मसु नियोक्तव्यानि।[87] कोऽप्यात्मानं [मन इति भावः] नावसादयेत्। न केनापि शस्त्रेण हिंसितः स्यात्।[88] योगाभ्यासं कुर्वाणा मृत्युना जीवने रोगैश्च न पीड्यन्ते।[89] विद्वत्प्रतिपादितविज्ञानस्य सेवनेन शरीरात्मानौ पुष्येते।[90] मित्राणि श्रेष्ठपुरुषा नियन्तारो नृपा महात्मानश्चास्माकमायुर्न प्रक्षिणुयुर्येन वयं युद्धेषु वीराणां बलादिकं प्रख्यापयेम। भावार्थो निष्कृष्यति यदात्मनो बलमिवान्येषां बलस्य वृद्धिमपि कामयेरन्।[91] उत्तमरूपाणां निष्पादको विशेषज्ञानेन पक्वं सुप्रियं सुन्दरं चान्नं प्राप्नोति सुखी च भवति।[92] मांसपचने पात्रे द्वेषपूर्णा रसान्नादिपचनपात्राणाम्[93] उत्कर्षस्याभिज्ञानप्रयोगयो र्ज्ञातारः पौष्टिकानामन्नानां स्वलङ्कर्तारो जनाः कर्माणि साध्नुवन्ति।[94] श्रेष्ठ-सुपक्वपौष्टिकान्नस्य, शोधितजलस्य, मांसहीनभोजनस्य प्रयोगेणोद्यमकीर्ती[95] प्राप्येते।[96] अन्नादीनां पाचका उदरस्थस्य पक्वान्नस्य दुर्गन्धमपनेतुं परिपक्व-पदार्थान् पौष्टिकं पाचयन्तु। भावार्थानुसारमुदररोगनिवारणाय सुसंस्कृत-मन्नमौषधानि च भुञ्जीरन्।[97] मांसपचने पात्रे द्वेषः स्यात्। अस्यायं भावो यन्न मांसं पचेयुर्न च खादेयुः।[98] अश्वानां मांसस्य पाचकान् धिक्कुर्यात्।

८४. दयानन्दभाष्येऽत्र पदार्थः सुतरां न संगच्छते। अत्र लेखे गृहीतो भावोऽभिप्रेतः प्रतीयते।
८५. ऋ. १।१६२।१७ ८६. य. २६।२२। [ऋ १।१६३।११] ८७. ऋ. १।१६२।१६
८८ य. २५।४३ ८९. ऋ. १६२।२० भावार्थः ९०. ऋ. १।१६२।७ भावार्थः
९१. य. २५।२४। [ऋ १।१६२।१] ९२. ऋ. १।१६२।३
९३. पदार्थे 'अश्वानाम्' इत्यस्ति। ९४. ऋ १।१६२।१३
९५. वाजिनम् = विटेमिनादियुक्तम्। पक्वं जलम् = १. उष्णीकृतं २. शोधितं च जलम्। सुरभिः = सुगन्धः, कीर्तिः। एतेऽर्था अत्र संगच्छन्ते। ९६. ऋ. १।१६२।१२ ; ३
९७. ऋ. १।१६२।१० ९८. ऋ. १।१६२।१३

कोऽप्यश्वादीनां मांसं नाद्यात्।[99] अश्वादीनां मांसस्य भक्षयितारो दण्डनीयाः सन्ति। ये तान् अश्वान् सुसाध्य तद्बलमुपयुञ्जते, ते प्रशंसामर्हन्ति।[100]

विद्या

२५. विद्यया पदार्थरचनां सृष्टिविद्यां च जानीयात्।[101] यथा विद्यया योगाभ्यासेन च परममैश्वर्यं कामयमानः[102] पुरुष आत्मानुरूपं भोगान् औषधानि पार्थिवान्यन्नादीनि लभते तयोरुद्यमशीलतया विद्याप्रयासाभ्यां सर्वे पदार्थविद्यां जानीयुः।[103] अन्नपाचकास्तथान्नं पचेयुर्येनान्नपचनपात्राद् वाष्पवेगेन पच्यमानः पदार्थो बहिर्न प्रसरेत्, वाष्पस्तु पात्र एव पुनः प्रविश्यान्नं पाचयेत्।[104] अत्रेदानीं प्रेशरकुकरनाम्ना प्रसिद्धस्य पात्रस्य संकेतो लक्ष्यते। पदार्थवेत्तारः कल्याणप्रदव्यवहाराणां शोधकाः, पदार्थानां विभागशः स्थापकाः, सत्यकारणपदार्थानां रक्षकाणां पदार्थानां कारणं संयोगं चानुक्रमाज्जानन्ति।[105] विदुषां शिक्षया मानवः सभ्यो भवति, विचक्षणबुद्धयश्च विद्यया तीव्रा जायन्ते।[106] संस्कृतभावार्थस्याभिप्रायोऽश्वा इव विचक्षणा जना अपि पाचनशक्तियुताः स्युरिति प्रतीयते।[107] विशिष्टज्ञानवतां विद्याजन्म यथा श्रेष्ठं बलयुतं च भवति, तथैव सर्वेषां मानवानां स्यात्।[108क]

आत्मज्ञानम्

२६. सर्वं जन्मैश्वर्यादिकमात्मज्ञानं विना व्यर्थमेव। मानवा एवात्मज्ञानाधिकारिणो, नेतरे जडचेतनपदार्थाः। अतः परिकल्पेऽस्मिन् आत्मज्ञानप्राप्तिरप्युपदिष्टा—अग्निमिवात्मानं पश्यन्तु जनाः।[109] अयं भावः—यथाग्निः सद्यो वेगेन च बहूनि कार्याणि साध्नोति, तथैव देहस्थ आत्मापि मानवजीवने विविधानि कार्याणि निष्पादयति यथा पार्थिव कार्याणां सुष्ठु करणाय अग्नेः सम्यग्ज्ञानमनिवार्यं तथैव लौकिकपारलौकिककर्मणां सम्यक् सिद्ध्यै मोक्षप्राप्त्यै चात्मनो ज्ञानमनिवार्यम्। एवं सति सर्वैः सप्रयासमात्मज्ञानं

---

९९. य. २५।३६ ; ३७ [ऋ. १।१६२।१२ ; १५] १००. य. २५।३५
१०१. य. २६।१३ भावार्थः [ऋ. १।१६३।२]
१०२. पदार्थे 'प्रसिष्ठः = अतिशयेन प्रसिता' इत्यस्ति। १०३. ऋ. १।१६३।७
१०४. ऋ. १।१६२।१५ हिन्दी पदार्थः १०५. अध्येतॄणामिति भावः
१०६. ऋ. १।१६३।५ १०७. ऋ. १।१६२।१४ हिन्दी भावार्थः
१०८. तत्रैव संस्कृतभावार्थः १०८अ. ऋ. १।१६३।४ १०९. य. २९।१७

प्राप्तव्यम् । यथोपरि वर्णितं परमात्मन्यात्मानं व्यवस्थाप्यैव मानवो मोक्षं लभते । ऐहिकसुखप्राप्तिस्तया चात्मज्ञानं प्राप्य मोक्षप्राप्तिरेवाश्वमेधयाग इति दयानन्दभाष्यस्योपरितनस्याश्वमेधिकपरिकल्पस्य सारः प्रतिभाति । "यत्रैतेन यज्ञेन यजन्ते क्लृप्तः प्रजानां योगक्षेमो भवति ।"[११०] इत्युक्तवता शतपथकारेणाप्यश्वमेधस्य स एव परिकल्प उद्घोषितो यो दयानन्द स्वामिनोद्भावित उपरि चास्मिन् लेखे सारतो वर्णितः । मनीषिणस्तद्विदां-कुर्वन्तु । इति ।

अत्र प्रयुक्तानि संक्षेप-चिह्नानि

ऋ.—ऋग्वेदे । **नि.**—निरुक्ते । **य.**—यजुर्वेदे (शुक्लेमाध्यन्दिनीये) ।

[ ] (१) अनयोः कोष्ठकयोः प्रदत्ता लेखा लेखकस्य सन्ति न दयानन्द भाष्यस्य ।

(२) अनयोः कोष्ठकयोः प्रदत्त ऋग्वेदस्य वा यजुर्वेदस्य वा संकेतस्तत्र तत्र तुलनार्थं प्रत्तो वर्त्तते यत्रोभयत्र मन्त्रपाठस्य पूर्णतावाऽल्पेऽपि पदार्थे वा भावार्थेवोभयत्र वा व्याख्याने प्रभूतो भेदो वर्तते ।

अश्वमेध मधिकृत्य लेखकेनानेन हिन्दीभाषायां प्रस्तुता लेखाः—

१. **ऋग्वेदीय अश्वमेधसूक्त** १।१६२ ; वेदोद्धारिणी, [फ्लैट ११, वेस्ट पटेल नगर, नई दिल्ली], १. ५-६ ; मार्च, १९८५ ; पृ. ८८-१०४ ।

२. **अश्वमेध** ; वेदसविता [वेदसंस्थान, ७०।२६, ब्यावर रोड, अजमेर], ५. १० ; ११ ; मई, जून, १९८५ ; पृ. ३४२-३५१ ; ३७३-३७८ ।

३. दयानन्द भाष्य में अश्वमेध का परिकल्प ; डा. प्रह्लाद कुमार स्मृति समिति, दिल्ली द्वारा प्रकाश्यमान । [अस्य परिधिर् यजुर्वेदस्य दयानन्दभाष्यमस्ति] ।

—०—

११०. शतपथब्राह्मणे १३।१।६।१०

"अभाव-भावनायामद्वैतदर्शनम्"

डः दीपक घोषः

अद्वैतदर्शनेऽद्वैतब्रह्मतत्त्वेतर-निखिलजगत्-प्रपञ्च-पदार्थस्यानभ्युपगततया निराकृता वैशेषिक-दर्शन-सम्मता द्रव्यादिपदार्थाः अद्वैतदार्शनिकप्रवरैश्चित्सुखाचार्य्यादिभिस्तत्रभवतामद्वैत-तर्कग्रन्थेषु। अतएव चित्सुखाचार्य्य-विरचित-तत्त्वप्रदीपिका-ग्रन्थे समुपलभ्यन्ते खण्डशो विखण्ड्यमाना वैशेषिक-सम्मता द्रव्यादि-सकल-पदार्थाः।

तत्र तत्र ग्रन्थेषु यथा वैशेषिकदर्शन-सम्मता द्रव्यादयः षड्भावपदार्थास्तथा तद्दर्शनसम्मतोऽभाव-पदार्थोऽपि सुतरामेव निरस्येतेति न कश्चिदत्रास्ते संशयावसरः। इयं हि तत्रभवतामद्वैताचार्य्याणामद्वैतग्रन्थेषु सर्वथापि लक्षणानर्हस्य वैशेषिकसम्मतस्याभाव-पदार्थस्य खण्डन-प्रक्रिया[1]—"कोऽयमभावः? भावादन्यो वा? भावत्वानधिकरणं वा? भावविरोधी वा? भावेन स्वभाव-प्रत्यासन्नो वा? नास्तीति प्रत्ययविषयो वा? प्रतियोगि-सापेक्ष-निरूपणो वा? अस्तीति बुद्धेरविषयो वा? निर्विकल्पकबुद्धेरविषयो वा? भावलक्षण-रहितो वा? नाद्यः, भावस्यापि भावादन्यत्वेनातिव्याप्तेः।......न च नवमः। राहित्यशब्देनाप्यभावाभिधानादात्माश्रयत्वापत्तेः"।

नन्वभावनामकः पदार्थश्चेत् कश्चिन्नैवाङ्गीक्रियते पदार्थतया, कथं तर्हि तस्य प्रमात्वार्थं करणरूपेणानुपलब्धिरिति प्रमाणमङ्गीक्रियतेऽद्वैत-चारिभिः? उच्यते—ब्रह्मैकतत्त्वभिन्नपदार्थस्यास्वीकरणात् सुतरामभावपदार्थोऽपि पार-मार्थिकतया नाभ्युपेत इति सत्यम्, व्यावहारिकतया तु निखिलजगत्प्रपञ्चा-न्तर्गततयाऽभावोऽपि पदार्थो नितान्तव्यावहारिकपदार्थरूपेण किञ्चिदभ्युपगत एव। किञ्च, व्यवहारे भाट्टनय इति न्यायेन भाट्ट-मीमांसकपदवीमनुसृत्य षट्प्रमाणवादिनोऽद्वैतदार्शनिका अनुपलब्धिमपि क्रोडीकुर्वन्ति व्यावहारिक-प्रमेयपदार्थस्याभावस्य प्रमाणरूपेण[2]—अभावषष्ठान्येतानि भाट्टवेदान्तिनस्तथा

१। तत्त्वप्रदीपिका (चित्सुखाचार्य्यकृता) पृष्ठा—४३६-४४० (वाराणसी)

२। वरदराजकृततार्किकरक्षा, पृष्ठा ५६, (काशी)

इति[1]। श्लोकवार्त्तिकाभिधभाट्टमीमांसाग्रन्थे अनुपलब्धिर्नाम प्रमाणं प्रतिपादितमित्थम्—[1]

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥

धर्मराजाध्वरीन्द्रकृतवेदान्तपरिभाषेत्यद्वैतप्रमाणतत्त्वप्रतिपादक-महार्घ-प्रकरण-ग्रन्थेऽनुपलब्धिप्रमाणस्थापनार्थं पृथक्परिच्छेदोऽपि परिकल्पितः। तत्रानुपलब्धेर्लक्षणं यथा—

[2]'ज्ञानकरणाजन्याभावानुभवासाधारणकारणमनुपलब्धिरूपं प्रमाणम्'। हन्त! अद्वैतप्रमाणतत्त्वप्रतिपादकग्रन्थेऽस्मिन्ननुपलब्धेः प्रमाणस्य स्वरूपं यथा विश्लेषितं तथाऽभावपदार्थस्यानुपलब्धिनामकषष्ठप्रमाण-जन्यत्वेऽपि प्रत्यक्षविषयत्वमेवापतति। तत्तु नैव रुचिकरं परमनिष्ठावतामद्वैताचार्य्याणाम्। तस्मादभिहितं पञ्चपादिका-विवरण-ग्रन्थे—

[3]ननु ज्ञानाभावविषयोऽयमवभासः, न, अपरोक्षावभासत्वात् अहं सुखीतिवत्, अभावस्य षष्ठ-प्रमाणगोचरत्वात्, प्रत्यक्षाभाववादिनोऽपि नात्मनि ज्ञानाभावावगमः सम्भवति"। कलिकाता-राष्ट्रिय-संस्कृत-महाविद्यालयस्य महाचार्य्यविभागीयाध्यापकवर्याणामस्मदीयानां परमपूजार्हाणामाचार्य्याणां पण्डितप्रवराणां श्रीश्रीमोहन-भट्टाचार्य्यमहोदयानाम्[4] "अद्वैतमतसमीक्षा"इति ग्रन्थे विषयमिममवलम्ब्य महानेको प्रबन्धो वङ्गभाषया समालोच्यते। तार्किकमतेनैव संयुक्त-विशेषणता-लौकिक-सन्निकर्षेण प्रत्यक्ष-विषयत्वमभावस्य। तदुक्तं भाषा-परिच्छेदग्रन्थे—[5]

"विशेषणतया तद्वदभावानां ग्रहो भवेत्" इति।

इदमत्रावधेयं यत् अद्वैतप्रमाणतत्त्वे प्रमाणानां द्विविधं प्रामाण्यं[6] व्यावहारिक-तत्त्वावेदकप्रामाण्यं पारमार्थिक-तत्त्वावेदक-प्रामाण्यञ्च। अपरोक्ष-

---

१। श्लोक-वार्त्तिके अभाव-परिच्छेदे १ श्लोकः
२। वेदान्त-परिभाषा—अनुपलब्धि परिच्छेदः
३। पञ्चपादिका-विवरणम्—पृः ७४ (माद्रज, १९५८)
४। अद्वैतमत-समीक्षा—पृः १३ (संस्कृत-महाविद्यालयतः, १९७५)
५। भाषा-परिच्छेदः—प्रत्यक्ष-खण्डः, कारिका—६१
६। भारतीयदर्शनकोष-'वेदान्तः' (श्रीश्रीमोहनभट्टाचार्य्यकृतः) पृः—१७० (कलिकाता-संस्कृत-महाविद्यालयतः)

स्वरूप-ब्रह्मैकतत्त्व-प्रतिपादनपरेऽद्वैत-दर्शने व्यावहारिक-दृष्ट्या यथा अनुमानादीनाम्, तथा अनुपलब्धिनामकप्रमाणस्यापि व्यावहारिक-तत्त्वावेदक-प्रामाण्यमेव—न ततः किञ्चिदधिकम्। अतएव अद्वैतसिद्धान्तानुसारेण यथा अभावो वैशेषिकदर्शनस्वीकृतद्रव्यादिजागतिकपदार्थवद् व्यावहारिकपदार्थ-विशेषस्तथा तदर्थमभ्युपेयं प्रमाणमनुपलब्धिरपि नाम नितान्तव्यावहारिक-तत्त्वावेदक-प्रमाणमेवेत्यद्वैतदार्शनिकानामुक्तिर्युक्तियुक्ततयैव चिन्त्यते।

अद्वैतदार्शनिकानामभावभावनाप्रसङ्गे इदमप्यनुसन्धेयं यदाचार्य-मन्डनमिश्राभिमतभावाद्वैतदर्शने मोक्षावस्थायाम् अविद्याया निवृत्तिरर्थात् अभावो न ब्रह्मस्वरूपः, अपि तु तदतिरिक्तः। एतन्मतेन यथा ब्रह्मरूपं भाववस्तु तत्त्वम्, तथा अविद्याया अभावोऽपि तत्त्वान्तरम्। नैवं तत्त्वान्तरा-भ्युपगमे काचन हानिः स्यादद्वैततत्त्वस्येति भावाद्वैतवादिनो मण्डनमिश्रा मन्यन्ते। शाङ्करब्रह्माद्वैताभिमतेन तु न तथा भवितुमर्हति। मोक्ष-दशायामविद्याया अभावस्य अद्वैत-ब्रह्मस्वरूपतया परमार्थतोऽभावनामक-पदार्थस्य तत्त्वत्वं नास्त्येवेति शाङ्करब्रह्माद्वैतवादिनामाशय इत्यभाव-भावनायामद्वैतदर्शनमवलम्ब्य विरचितस्य दिग्दर्शनमात्रस्य प्रबन्धस्यापाततो विरतिः।

भारविकृतौ कालिदासकृतिसादृश्यम्

श्रीसीतानाथ आचार्य्यः

स्निग्धप्रेरणया निरन्तरमहो सारस्वते वर्त्मनि
योऽस्मान् प्रेरितवान् गुरुः स जनकः कौमारतः पुत्रकान् ।
सम्प्राप्तोऽपि दिवं पुरा मनसि नो यो राजतेऽहर्निशं
तस्याङ्घ्रौ प्रथमं समर्प्यत इयं भक्त्या प्रणामाञ्जलिः ॥
श्रीकालिदासकविता सरसोत्तमा क्व
श्रीभारवेः कविकृतिः क्व च चित्तरम्या ।
अस्माकमल्पविषया विहगानुकल्पा
दृष्टिः समीक्षणविधौ कविकर्मणः क्व ॥
तथापि जनकस्याशीरमोघा हृदयस्थिता ।
मां प्रेरयति कृत्येऽत्र प्रबन्धरचनात्मके ॥
संस्कृतस्य महाकाव्यगगने दीप्तिशालिनोः ।
काव्यसादृश्यमाश्रित्य भारविकालिदासयोः ॥ युग्मकम् ॥
तस्मात् सन्तः कृपावन्तो मर्षयन्तु गुणैः स्वकैः ।
अपाटवोत्थितं दोषं जायमानं पदे पदे ॥

कालिदासोत्तरकालिकेषु महाकाव्यप्रणेतृषु प्रथमस्तावत्तत्रभवान् भारविरिति तत्त्वविदामभिमतम् । यद्यपि भारवेः काव्यरचनारीतिः स्वतन्त्रे वर्त्मनि पदं कृतवती तथापि तदीयकाव्यकृतावन्तरान्तरा महाकवेः कालिदासस्य कृतिसादृश्यं समापतितमिति तयोः कविवरयोः कविकर्म साभिनिवेशं पर्य्यालोचयतां सचेतसां चेतसि प्रतिभायात् । तादृशस्य परिलक्ष्यमाणस्य सादृश्यस्य सामासिकं चित्रमेकं चित्रयितुमत्रास्माभिः समाधीयते प्रयत्नः ।

पार्वत्यास्तथा धनञ्जयस्य तपस्यावर्णनायां सादृश्यम्

कुमारसम्भवे महादेवं पतित्वेनाप्तुं पार्वत्या यथा कठोरे तपसि प्रवृत्तं किरातार्जुनीये वैरनिर्य्यातनानुकूलशक्तिलाभाय धनञ्जयेन तथैवोग्रं तपः समाचरितम् । एतयोस्तपस्याप्रकारवर्णने कविद्वयस्य रचनासादृश्यं लक्षणीयम् ।

तथाहि तपसि स्थिताया उमाया तपस्यतोऽर्जुनस्य च वल्कलपरिधानं (कु. ५।८; कि. १२।२७) जटाधारणमभिषवविधानम् (कु. ५।६, १६; कि. ६।२३, १०।१२, १२।१०, १४) उपवासाचरणम् (कु. ५।२२, २८; कि. १२।२) एवमादिकस्तपस्याप्रकार उभयत्र काव्ये भिन्नया भङ्ग्या प्रतिपादितः। किञ्च पार्वत्यास्तपःसिद्धिं वर्णयता कालिदासेनोक्तम्—

विरोधिसत्त्वोज्झितपूर्वमत्सरं द्रुमैरभीष्टप्रसवार्चितातिथि।
नवोटजाभ्यन्तरसम्भृतानलं तपोवनं तच्च बभूव पावनम्॥ (कु. ५।१७)

धनञ्जयस्य तपःसमृद्धिं प्रकाशयता भारविणा निगदितम्—

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः।
विनमन्ति चास्य तरवः प्रचये परवान् स तेन भवतेव नगः॥
(कि. ६।३४)

कालिदासश्लोकस्य प्रथमार्धेन सह भारविश्लोकगतप्रथमचरणत्रयस्य सादृश्यमत्र सुस्पष्टम्। तथाहि तपःप्रभावात् तत्रत्यैर्वन्यप्राणिभिर्हिंसा परित्यक्ता वृक्षैश्च फलपुष्पादिकं प्रादीयतेति कविद्वितयेन वर्णितम्। पार्वत्या धनञ्जयेन चातिमुनि तपः समाचरितमिति प्रस्तूतं क्रमेण कालिदासेन भारविणा च। तद्यथा—तया मुनीनां चरितं व्यगाहत। (कु. ५।१६) तपः शरीरैः कठिनैरुपार्जितं तपस्विनां दूरमधश्चकार सा। (कु. ५।२६) चरितैर्मुनीनधरयन् शुचिभिः। (कि. ६।२४) तपस्यतः सूर्याभिमुखस्थितिरुभाभ्यामेव कविभ्यां वर्णितम्। तद्यथा—

शुचौ चतुर्णां ज्वलतां हविर्भुजां शुचिस्मिता मध्यगता सुमध्यमा।
विजित्य नेत्रप्रतिघातितीं प्रभामनन्यदृष्टिः सवितारमैक्षत॥
(कु. ५।२०)

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः।
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः॥
(कि. १२।२)

पार्वत्या इव पार्थस्य तपःपरीक्षार्थं हरस्येव वासवस्य समागमे श्रमापनोदनसंलापादौ च सादृश्यम्

कुमारसम्भवस्य पञ्चमे सर्गे पार्वत्यास्तपःपरीक्षार्थं महादेवश्छद्मवेशेन समागतः। किरातार्जुनीयेऽपि धनञ्जयस्य तपोदार्ढ्यं निर्णेतुकामो वासवः

समुपस्थितः। महादेवो जटावान् कृष्णमृगचर्म परिधाय पलाशदण्डं धारयन् ब्रह्मवर्चसेन समुज्ज्वल आश्रमपदमाजगाम। छद्मवेशिनो वासवस्याप्यासन् शिरसि जटा हस्ते चैका यष्टिर्लोकाभिभाविना तेजसा सोऽप्यदीप्यत। वैलक्षण्यमेतदेव यन्महादेवो वयसा नवीनतया देवराजस्तु प्रवीणतया समुपागतः। किञ्च कालिदास एकेनैव श्लोकेन शङ्करस्य समागमवर्णनं विहितवान् भारविस्तु समुपस्थितस्य देवेन्द्रस्य वर्णनविधौ पञ्च श्लोकान् विरचितवान्[1]।

तावुभौ महादेववासवौ वस्तुतः अश्रान्तावपि व्याजेन श्रमापनोदनं प्रकाशितवन्तौ। तस्य च श्रमापनोदनच्छलस्य प्रकाशनमपि उभाभ्यामेव कविभ्यामेकविधशब्दप्रयोगेन विहितम्। तद्यथा—परिश्रमं नाम विनीय च क्षणम् (कु. ५।३२) इति कुमारे। विश्रम्य विष्टरे नाम (कि. ११।६) इति किराते।

अनयोर्द्वयोः समागतयोः संलापसमारम्भेऽपि परं साम्यं विद्योतते। तथाचाभ्यामुभाभ्यामेव प्रथमतः प्रशंसया बोद्धुरनुकूलतां सम्पाद्य स्वकीयं वक्तव्यमुपस्थापितम्[2]। किञ्च सुरूपयोरनयोरेतादृशेन तपस्याचरणेन गुणवत्तापि महती प्रकाशितेति द्वाभ्यामेव कविभ्यां निगदितम्। तद्यथा—

> यदुच्यते पार्वति! पापवृत्तये न रूपमित्यव्यभिचारि तद्वचः।
> तथाहि ते शीलमुदारदर्शने तपस्विनामप्युपदेशतां गतम्॥ (कु. ५।३६)
> श्रेयसीं तव सम्प्राप्ता गुणसम्पदमाकृतिः।
> सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्॥ (कि. ११।११)

युधिष्ठिरस्योक्तौ हिमालयस्योक्तेः प्रतिबिम्बनम्

कुमारसम्भवकाव्यस्य षष्ठे सर्गे महादेवेन पार्वत्याः पाणिग्रहणप्रस्तावमादाय समागतान् सप्तर्षीन् प्रति हिमालयस्य विनयसौजन्ययुक्ताया उक्तेः प्रभावः परिलक्ष्यते किरातार्जुनीयकाव्यस्य तृतीये सर्गे समुपस्थितं व्यासदेवं प्रति युधिष्ठिरस्योक्तौ। तद्यथा—

> अपमेघोदयं वर्षमदृष्टकुसुमं फलम्।
> अतर्कितोपपन्नं वो दर्शनं प्रतिभाति मे॥ (कु. ६।५४)

१। द्रष्टव्याः श्लोकाः कु. ५।३; कि. ११।१—५।

२। द्रष्टव्याः श्लोकाः कु. ५।३६—३८ कि. ११।१०—११।

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।

तुल्या भवद्दर्शनसम्पदेषा वृष्टेर्दिवो वीतवलाहकायाः ।। (कि. ३।५)

अत्र कालिदासस्य 'अपमेघोदयं वर्षमि'त्यस्यैव प्रतिरूपं भारवेः 'वृष्टेर्दिवो वीतवलाहकाया'इति तथा 'अदृष्टकुसुमं फल'मित्यस्य 'फलस्य सवित्री' इति । 'अनाप्तपुण्योपचयैर्दुरापा' इत्यंशः केवलमधिकतयैव भारविणोपात्तः । कालिदासकवितायां रूपकमलंकारो भारवौ तूपमालंकारः । उभयत्र श्लोके दर्शनस्य विस्मयजनकत्वमुपकारकत्वमानन्ददायकत्वञ्चाभिव्यञ्जितम् । सप्तर्षि-समागमेनात्मनो गौरवं प्रकाशयता हिमालयेनोक्तम्—'अद्य प्रभृति भूताना-मधिगम्योऽस्मि शुद्धये ।' (कु. ६।५६) व्यासस्याविर्भावेन स्वस्य बहुमान-पात्रतां प्रतिपादयता युधिष्ठिरेणोक्तम्—'आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद् बहुमानपात्रम्' । (कि. ३।६) समागतातिथिजनस्य समागमप्रयोजन-पृच्छाशैली कविद्वये समानरूपैव परिलक्ष्यते । यद्यथा—

कर्तव्यं वो न पश्यामि स्याच्चेत् किं नोपपद्यते ।

मन्ये मत्पावनायैव प्रस्थानं भवतामिह ।। (कु. ६।६१)

तथापि तावत् कस्मिंश्चिदाज्ञां मे दातुमर्हथ ।

विनियोगप्रसादा हि किङ्कराः प्रभविष्णुषु ।। (कु. ६।६२)

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निस्पृहाणाम् ।

तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ।।

(कि. ३।६)

प्रयोजनसिद्धेः स्वायत्ततया आगमनजिज्ञासा निरर्थिकैवेति भावसाम्यमुभयत्र । तथापि आत्मनोऽनुग्रहार्थं प्रयोजनपृच्छेति हिमालयोक्तेः कल्याणजनकवाक्य-श्रवणेच्छयैव प्रयोजनजिज्ञासेति च युधिष्ठिरोक्तेस्तात्पर्य्यम् ।

युधिष्ठिरस्योक्तावेकत्र सप्तर्षीणामुक्तेरानुरूप्यम्

स्मरणमात्रमेव समागताः सप्तर्षयः सानन्दचेतसा देवदेवमुक्तवन्तः—

यद्ब्रह्म सम्यगाम्नातं यदग्नौ विधिना हुतम् ।

यच्च तप्तं तपस्तस्य विपक्वं फलमद्य नः । (कु. ६।१६)

व्यासस्यागमनात् प्रफुल्लान्तःकरणेन युधिष्ठिरेणाप्युक्तम्—

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सम्प्रति भूमिदेवाः ।

(कि. ३।६)

समाचरितशुभकर्मणः परिणामरूपेण महादेवसन्दर्शनं सप्तर्षिभिर्लब्धं व्याससान्निध्यलाभश्च युधिष्ठिरेण प्राप्त इति वक्तव्यसाम्यमत्रावधारणीयम् ।

प्राचीनभारतीयराजनीतिज्ञानस्यानुरूप्येण प्रकाशः

रघुवंशकाव्यस्य सप्तदशे सर्गे वर्णिताया अतिथे राज्यशासनरीतेः कश्चन प्रभावः किरातार्जुनीयकाव्यस्य प्रथमे सर्गे समुपस्थापितायां दुर्य्योधनराज्यशासनपद्धत्यां समापतितः स्यादिति प्रतिभाति । तथाहि राजातिथिः कामादीनन्तःशत्रून् जितवान्, नक्तन्दिवं यथानिर्दिष्टं नृपकर्तव्यं समाचरितवान्, नीत्यनुगते क्षमाशयौर्य्ययोः समन्वयसमन्विते पथि च विचचार । यथोक्तम्—

अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः ।
अतः सोऽभ्यन्तरान् नित्यान् षट् पूर्वमजयद्रिपून् ।। (रघु. १७।४५)
कातर्य्यं केवला नीतिः शौर्य्यं श्वापदचेष्टितम् ।
अतः सिद्धिं समेताभ्यामुभाभ्यामन्वियेष सः ।। (रघु. १७।४७)
रात्रिन्दिवविभागेषु यदादिष्टं महीक्षिताम् ।
तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ।। (रघु. १७।४६)

एतच्छ्लोकत्रितयप्रतिपादितस्य निरुक्तरूपस्य नृपतेरतिथेश्चरितादर्शस्य प्रतिविम्बनं जातमेकस्मिन् भारविश्लोके । यद्यथा—

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ।।
(कि. १।६)

महाराजो दुर्य्योधनः कामादीन् विजित्य नीतियुक्तं पौरुषमवलम्ब्य रात्रिन्दिवं यथाविभागं राजकर्म सम्पादितवान् निरलसतयेति भारविणा वर्णितम्[१] । "धर्मार्थकामाः सममेव सेव्या" इति शास्त्रानुशासनं यथा नृपतिनातिथिना परिपालितं तथा राज्ञा दुर्य्योधनेनापि । यथोक्तम्—

न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थं कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ।। (रघु. १७।५७)

---

१ । कातर्य्यं केवला नीतिरित्यादिश्लोकस्य समधिकतया प्रतिविम्बनं यथान्यस्मिन् भारविश्लोके—
समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ।। (कि. २।३८)

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम्॥
(कि. १।११)

अतिथेः सुशासनेन राज्ये सम्पदो यथा स्वत एव प्रवृद्धिं गतास्तथा दुर्य्योधनस्यापीति वर्णनासाम्यं कविद्वयवचसि। तद्यथा—

खनिभिः सुषुवे रत्नं क्षेत्रैः शस्यं वनैर्गजान्।
दिदेश वेतनं तस्मै रक्षासदृशमेव भूः॥ (रघु. १७।६६)
उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी॥
(कि. १।१८)

प्रनिधिप्रयोगद्वारातिथिर्यथा स्वपरराष्ट्रवृत्तं सर्वमशेषं ज्ञातवांस्तथा दुर्य्योधनोऽपि। परन्तु तयोश्चेष्टितं कोऽपि कथमपि ज्ञातुं न शशाक। एतादृशं वक्तव्यसाम्यं कविद्वयवचसि समासाद्यते। तद्यथा—

न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधितेः।
अदृष्टमभवत् किञ्चिद् व्यभ्रस्येव विवस्वतः॥ (रघु. १७।४८)
मन्त्रः प्रतिदिनं तस्य बभूव सह मन्त्रिभिः।
स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते॥ (रघु. १७।५०)
परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परैः।
सोऽपसर्पैर्जजागार यथाकालं स्वपन्नपि॥ (रघु. १७।५१)
महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः॥
(कि. १।२०)

एतयोरतिथिदुर्य्योधनयोरुत्तमा चारव्यवस्था मन्त्रगुप्तिश्चास्तामिति द्वाभ्यामेव कविभ्यामभिव्यञ्जितम्। महाराजस्य दिलीपस्याप्येतादृशी मन्त्रगुप्तिः प्रकाशिता कालिदासेन। तद्यथा—

तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च।
फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव। (रघु. १।२०)

नृपतेरतिथेरिव दुर्य्योधनस्याप्याज्ञा नृपान्तरैः सानन्दमुह्यते स्मेति वर्णनसाम्यं कविद्वयकाव्यात् सुस्पष्टमवगन्तुं शक्यते। तद्यथा—

दूरापवर्जितच्छत्रैस्तस्याज्ञां शासनार्पिताम्।
दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव ॥ (रघु. १७।७९)
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥
(कि. १।२१)

अत्र भारविणा शासनस्य सादरमुह्यमानत्वं प्रतिपादयितुं माल्यस्योपमानत्वं यदुपात्तं तत्रापि कालिदासस्य प्रभावः परिलक्ष्यते। तथाच कुमारसम्भवकाव्ये मदनो वासवस्यादेशं सानन्दं स्वीकृत्य गतवानिति वर्णयता कालिदासेनोक्तम् —तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे। (कु. ३।२२) 'शेषामिव प्रसाददत्तां मालामिवे'ति मल्लिनाथः।

कालिदासेन राज्ञोऽतिथेः सुविचारकत्वं तथा नृपतेर्दिलीपस्य पक्षपात-शून्यतया सम्यग्दण्डधारित्वञ्च प्रतिपादितम्। यथोक्तम्—

स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम्।
ददर्श संशयच्छेद्यान् व्यवहारानतन्द्रितः ॥ (रघु. १७।३९)

अतिथिविषयिणी कालिदासस्येयमुक्तिः। स्थित्यै दण्डयतो दण्ड्यान्। (रघु. १।२५)

द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षतः ॥ (रघु. १।२८)

दिलीपमवलम्ब्य कालिदासस्येयमुक्तिः। भारविणापि दुर्य्योधनस्य पक्षपात-रहितां विचारपद्धतिं प्रकाशयतोक्तम्—

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥
(कि. १।१३)

प्रकृतिवर्णनासादृश्यम्

कालिदासस्य काव्यरचनायां मानवेतरप्रकृतिः प्रायेण मानवप्रकृत्या सह मैत्रीमापन्नेव चित्रिता। भारविकाव्येऽपि तादृशं चित्रणमन्तरान्तरा नयनयोरापतति। तथाहि नन्दिनीपरिचर्य्यातत्परे दिलीपे वनं प्रविष्टे वृक्षाः

पक्षिणां विरावैर्जयशब्दं कृत्वा तमभिनन्दयामासुः लताश्च प्रसूनवर्षणैस्तं संवर्धयाञ्चक्रुः पवनोऽपि मन्दं मन्दं प्रवहन् तं सेवितवानिति कालिदासेन रघुवंशकाव्यस्य द्वितीये सर्गे वर्णितम्। तद्यथा—

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः॥ (रघु. २।९)
मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।
अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः॥
(रघु. २।१०)

पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे॥ (रघु. २।१३)

धनञ्जयेऽपि तपस्यार्थमिन्द्रकीलमधिरोहति सति महीरुहो भ्रमरविरुतैर्जयशब्दं कृतवन्तः पुष्पाणि च समवर्षन् सुगन्धः पवनोऽपि बन्धुवृत्त्या तमालिङ्गितवानिति भारविणा स्वकाव्यस्य षष्ठे सर्गे वर्णितम्। यद्यथा—

तमनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः।
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः॥
(कि. ६।२)

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः।
परिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः॥
(कि. ६।३)

प्राकृतिकपदार्थानां वास्तवानुगचित्रणेऽपि कविवरयोरनयोः कादाचित्कं सादृश्यं परिदृश्यते। तथाहि शरत्काले सम्प्रवृत्ते वृषाणां दर्पोद्धतं विचरणमुभाभ्यामेव कविभ्यां वर्णितम्। तद्यथा—

मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्॥ (रघु. ४।२२)
परीतमुक्षापजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरोधसम्।
ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम्॥
(कि. ४।११)

तस्मिन् काले मदमत्तो वृषो वृषान्तरं न सहते नदीतटगतानां मृत्तिकानां

शृङ्गाभ्यामुत्तोलनं करोति। एतादृशः शरत्कालोचितो वृषस्वभावः श्लोकद्वये भिन्नया भङ्ग्या प्रकाशितः।

औपम्यसाम्यम्

कुमारसम्भवे समाधिमग्नस्य महादेवस्य तथा किरातार्जुनीये शिवगणैः सहाभियोक्तुमुद्यतस्य धनञ्जयस्य वर्णनायामौपम्यसादृश्यं परिलक्ष्यते। महादेवं वर्णयता कालिदासेन कथितम्—

अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्॥

(कु॰ ३।४८)

धनञ्जयं वर्णयतो भारवेरुक्तिः—

निषण्णमापत्प्रतिकारकारणे शरासने धैर्य्य इवानपायिनि।
अलङ्घनीयं प्रकृतावपि स्थितं निवातनिष्कम्पमिवापगापतिम्॥

(कि॰ १४।३७)

महादेवस्य महानुभावं प्रकाशयितुं कालिदासेनोपमानत्रयमुपात्तम् अम्बुवाहः अपामाधारः प्रदीपश्चेति। प्रत्युपमानमेकैकं विशेषणमपि संयोजितम्। संग्रामात् पूर्वस्मिन् क्षणे गाण्डीवे वाणं योजयतो धनञ्जयस्य गाम्भीर्य्यं वर्णयतो भारवेरुपरि कालिदासोपात्तेषु त्रिषूपमानेषु एकस्य प्रभावः पतितः। तथाच अपामाधार इति कालिदासोक्तमुपमानमेव भारविश्लोके आपगापति-रित्युप मानरूपेण लक्ष्यते। किञ्च कालिदासीयं निवातनिष्कम्पेति प्रदीपस्य विशेषणमत्र आपगापतेर्विशेषणरूपेण भारविणा संयोजितम्। एवमत्र निवातनिष्कम्पमिवेति शब्दोपादानसादृश्यमप्युभयोर्लक्षणीयम्।

छद्मवेशेन समागतो महादेवस्तरुण्याः पार्वत्या वल्कलधारणस्यानौचित्यं प्रतिपादयन्नब्रवीत्—

किमित्यपास्याभरणानि यौवने धृतं त्वया वार्धकशोभि वल्कलम्।
वद प्रदोषे स्फुटचन्द्रतारका विभावरी यद्यरुणाय कल्पते॥

(कु॰ ५।४४)

यौवने वार्धक्योचितं वल्कलधारणं न तथा युक्तं यथा स्फुटचन्द्रतारका विभावरी अरुणस्य न योग्या ; यतोऽरुणकाले तादृशी विभावरी न सम्भवति।

किरातार्जुनीये वासवस्योपदेशस्याभाजनतामात्मनः प्रतिपादयितुमर्जुनेनैव-मुक्तम्—

श्रेयसोऽप्यस्य ते तात ! वचसो नास्मि भाजनम् ।
नभसः स्फुटतारस्य रात्रेरिव विपर्य्ययः ॥ (कि. ११।४४)

धनञ्जयः श्रेयस्करस्यापि वासवप्रदत्तस्योपदेशस्य पात्रं तथा न भवति यथा दिवसो रात्रिकालीनस्य नक्षत्रयुक्तस्य नभसः, यतो दिवसे तारकासमन्वितं नभो न दृश्यते। एवमत्र द्वयोरुपमेयपदार्थयोः (कालिदासकाव्ये यौवन-वल्कलयोः भारविकाव्ये धनञ्जयवासवोपदेशयोः) मिथोविरोधप्रतिपादनाय एकविधयोरेवोपमानयोः (एकत्र प्रदोषनिशारुणयोरन्यत्र दिवसतारकान्वित-नभसोः) उपादानं कृतं कविभ्याम् ।

वस्तुवर्णनाश्रयं साम्यम्

शिवशिरःस्थितचन्द्रस्य किरणैरलकाया हर्म्याणि नित्यमेव समुद्भासितानि भवन्तीति कालिदासेन कल्पितम् । शिवस्यैव करनिकरैर्हिमालयस्य वनप्रान्ताः कृष्णपक्षेऽपि विशदीभूता जायन्त इति भारविणा वर्णितम् । शिवस्य शिरसि स्थितस्य निशाकरस्य करनिकाराणां तत्रत्यवस्तुसमुद्भासकत्वरूपं कल्पना-सादृश्यमुभयत्र । तद्यथा—

गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या । (पूर्वमे ७)
सततमसितयामिनीषु शम्भोरमलयतीह वनान्तमिन्दुलेखा ।
(कि. ५।४४)

विनयोक्तिसादृश्यम्

अभिज्ञानशकुन्तलस्य सप्तमाङ्के स्वयं सम्पादितस्य दुर्जयदानववधव्यापारस्य दुष्यन्तेन तथा विक्रमोर्वशीयस्य प्रथमाङ्के तथाविधव्यापारस्य पुरूरवसा शतक्रतु-महिमैकसाध्यत्वं कथयता आत्मनो विनयविभूषितं चरित्रगौरवं प्रकाशितम् । किरातार्जुनीयस्य प्रथमसर्गेऽपि स्वबुद्धिपाटवात् विज्ञातदुर्योधनराज्यशासन-पद्धतिनापि वनचरेण तादृशं गौरवं युधिष्ठिरे समारोपितम् । तद्यथा—

अत्र खलु शतक्रतोरेव महिमा स्तुत्यः ।
सिद्ध्यन्ति कर्मसु महत्स्वपि यन्नियोज्याः सम्भावनागुणमवेहि
तमीश्वराणाम् ॥ (अभि. ७।५)

ननु वज्रिण एव वीर्य्यमेतद् विजयन्ते द्विषदो यदस्य पक्ष्याः ।
(विक्र. १।१५)

निसर्गदुर्बोधमबोधविक्लवं क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥
(कि. १।६)

जागतिकतथ्यसमृद्धानां भावानामुपस्थापनानुरूप्यम्

कवीनां प्रातिभनेत्रे जागतिकतथ्यानि यथायथरूपेण प्रतिभान्ति। कालिदासेन भारविणा च स्वस्वकृतिषु तादृशानां बहुविधानां तथ्यानामुपस्थापनं कृतम्। तेषु उभयोः कविवरयोः समानचिन्तावभासकानि कतिचन स्थलानि प्रदर्शयितुं यत्यते।

योग्यसमागमप्रशंसा

योग्येन सह योग्यस्य सम्मेलनं सर्वेषामेव प्रशंसनीयतां गाहत इति भावानुरूप्यमुभयोः कृतौ प्राप्तरूपम्। तथाहि अजेन्दुमत्यो र्योग्यसमागमं संस्तुवता कालिदासेनोक्तम्।

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥ (रघु ६।८५)

दुष्यन्तशकुन्तलयोरनुरूपसंयोगं प्रशंसयता कण्वशिष्येणोक्तम्—

त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमतीव सत्क्रिया।
समानयंस्तुल्यगुणं बधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥
(शकु. ५।१५)

शरद्वर्णनप्रसङ्गे पद्मयुक्तत्वान् मनोहारिणि वारिणि मनोरमस्य कलमस्य समागमसौन्दर्य्यं समभिनन्दयता भारविणोक्तम्—

तुतोष पश्यन् कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकम्।
सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसङ्गमे ॥
(कि. ४।४)

वर्षाशरदोः ऋतुसन्धिं वर्णयता भारविणोक्तम्—

समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥
(कि. १०।२५)

स्वभावसुन्दरस्य सर्वत्र सुन्दरत्वम्

प्रकृत्या सुन्दरं वस्तु येन केनापि प्रसाधितमप्रसाधितं वा सुन्दरमेव प्रतिभातीति भावसाम्यं कविद्वयवचसि बहुत्र परिलक्ष्यते । तद्यथा—

यथा प्रसिद्धैर्मधुरं शिरोरुहैर्जटाभिरप्येवमभूत्तदाननम् ।
न षट्पदश्रेणिभिरेव पङ्कजं सशैवलासङ्गमपि प्रकाशते ॥ (कु. ५।६)

अत्र पार्वत्या आननस्य शिरोरुहैरिव जटाभिरपि रम्यत्वं प्रति तथा पङ्कजस्य भ्रमरवृन्देनेव शैवालसङ्गेनापि सुन्दरत्वं प्रति निसर्गरम्यत्वरूपो हेतुर्गम्यमान एव । तस्य च वाच्यत्वेन प्रकाशनं यथा शाकुन्तले—

सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥
(शकु. १।१८)

वल्कलपरिहितां शकुन्तलामुद्दिश्य दुष्यन्तस्येयमुक्तिः । श्लोकस्यास्य चतुर्थे चरणे कविना स्पष्टत एवोक्तम्—निसर्गरम्यस्य वस्तुनो येन केनापि रम्यता जायत एवेति । अभिज्ञानशाकुन्तलस्य षष्ठेऽङ्केऽपि विरहखिन्नं राजानमभिलक्ष्य कञ्चुकिनोक्तम्—'अहो सर्वावस्थासु रामणीयकमाकृतिविशेषाणाम् । मालविकाग्निमित्रस्य द्वितीयेऽङ्केऽपि मालविकां विलोक्य राज्ञाग्निमित्रेणोक्तम्—सर्वावस्थासु चारुता शोभां पुष्यति । महाकवेर्भारवेः काव्येऽपि भावस्यास्य प्रकाशोऽसकृत् परिलक्ष्यते । तथाच वार्षिकशोभोपकरणाभावेऽपि शरन्नभः प्रकृत्यैव रम्यमजायतेति वर्णयता भारविणोक्तम्—

पतन्ति नास्मिन् विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ।
तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्य्यमपेक्षते गुणम् ॥
(कि. ४।२३)

स्वेदस्यापि विभूषणत्वं प्रतिपादयता भारविणान्यत्रोक्तम्—

सम्पेदे श्रमसलिलोद्गमो विभूषा रम्याणां विकृतिरपि श्रियं तनोति ।
(कि. ७।५)

विकारकारणेऽप्यविकृतता

विकारकारणे विद्यमानेऽपि महतां चित्ते विकृतिर्न जायत इति भावो द्वयोरेव कविवरयोः काव्ये समुपस्थापितः। तथाहि कुमारसम्भवे वसन्तो यथा समाहितचित्तस्य महादेवस्योद्दीपनाय नालमभवत्तथा किरातार्जुनीयेऽपि वर्षर्तुस्तपस्यतोऽर्जुनस्य चित्तविकृतिं जनयितुं न समर्थः समाजायत। तद्यथा—

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो वभूव।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥ (कु. ३।४०)
अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे।
जन इव न धृतेश्चचाल जिष्णु र्नहि महतां सुकरः समाधिभङ्गः॥
(कि. १०।२३)

अत्र कालिदासेन भारविणा च यथाक्रमं महादेवस्य धनञ्जयस्य च विकार—कारणसद्भावेऽपि विकाराभावं प्रतिपाद्य महामहिमशालिनां चरित्रवैशिष्ट्य-प्रकाशनद्वारा तादृशो विकाराभावः समर्थितः। अतः श्लोकद्वयेऽस्मिन् सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः।

क्षत्रियशब्दस्य व्युत्पत्तिलभ्यार्थप्रतिपादनम्

'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः। (रघु. ५।५३) इत्युक्त्वा दिलीपो यथा विपन्नत्रायकत्वमेव क्षत्रियशब्दस्य व्युत्पत्तिलभ्योऽर्थ इति प्रतिपादितवान् तथैव द्रौपदी 'स क्षत्रियस्त्राणसहः सतां यः' (कि. ३।४८) इत्युक्त्वा धनञ्जयाय सज्जनत्राणकारित्वमेव क्षत्रियत्वमिति स्मारितवती।

सतां समुदारा दृष्टिः

स्त्रीत्वपुंस्त्वनिबन्धनं भेदमनादृत्य सज्जनानां दृष्टिर्गुणपक्षपातिनी भवति इति तथ्यमुभाभ्यामेव कविभ्यामुररीकृतम्। तथाहि समागतान् सप्तर्षीन् तथा अरुन्धतीम् समानप्रतिपत्त्या समगृह्णान् महादेवः। तदेव समर्थयता कालिदासेनोक्तम्—

स्त्रीपुमानित्यनास्थैषा वृत्तं हि महितं सताम्। (कु. ६।२)

हितार्थयुक्तत्वात् स्त्रिया अपि द्रौपद्या वचनं युधिष्ठिरेण ग्रहणीयमिति समर्थयितुं किरातार्जुनीये भीमेनोक्तम्—

ननु वक्तृविशेषनिस्पृहा गुणगृह्या वचने विपश्चितः। (कि. २।१५)

१। भवभूतिनाप्युक्तम्—
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः। उ. च. ४।११

समानरूपाण्युक्त्यन्तराणि

प्रीतिरकारणमेव प्रीतिपात्रस्याकल्याणमाशङ्कते। यथोक्तम्—अतिस्नेहः पापाशङ्की। (अभि. अंकः ४) प्रेम पश्यति भयान्यपदेऽपि। (कि. ६।४०) महतामवमाननमनिष्टजनकं भवति। यथोक्तम्—प्रतिबध्नाति हि श्रेयः पूज्य-पूजाव्यतिक्रमः। (रघु. १।६) दिशत्यपायं हि सतामतिक्रमः (कि. १४।६) रुचिवैचित्र्यं जगति परिदृश्यमानम्। यथोक्तम्—भिन्नरुचिर्हि लोकः। (रघु. ६।३०) विचित्ररूपाः खलु चित्तवृत्तयः। (कि. १।३७) गुणानामाधिक्ये सामान्यो दोषो न परिगण्यते। यथोक्तम्—एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। (कु. १।३) नाल्पीयान् खलु सुकृतं हिनस्ति दोषः। (कि. ७।१२) गुणानां लोकानुरञ्जकत्वं प्रसिद्धम्। यथोक्तम्—पदं हि सर्वत्र गुणैर्निधीयते। (रघु. ३।६२) कमिवेशते रमयितुं न गुणाः। (कि. ६।२४) सतां सद्भिर्मैत्री त्वरितमेव जायते। यथोक्तम्—यतः सतां सन्नतगात्रि! सङ्गतं मनीषिभिः साप्तपदीनमुच्यते। (कु. ५।३६) सम्बन्धमाभाषणपूर्वमाहुः (रघु. २।५८) विश्वासयत्याशु सतां हि योगः। (कि. ३।३१)

काव्यार्थसादृश्यविधावालंकारिकाणां समीक्षा

नवनवोन्मेषशालिनीं प्रतिभामुपजीव्य यद्यपि कवयो नवनवकाव्यानि विरचयन्ति तथापि तेषां रचनासु कदाचित् किमपि सादृश्यं समापतति। कवीनां कृतिषु सम्भवदेतादृशं सादृश्यमेव संवादनाम्नाभिहितं ध्वनिकृता। यथोक्तं—संवादो हि काव्यार्थस्योच्यते यदन्येन काव्यवस्तुना सादृश्यम्। (ध्वन्या, पृ. ५६५) तादृशश्च संवादः प्रतिबिम्बवदालेख्यवत्तुल्यदेहिवदिति त्रिविधो भवितुमर्हतीति तेनैव समीरितम्। तद्यथा—

संवादो ह्यन्यसादृश्यं तत् पुनः प्रतिबिम्बवत्।

आलेख्याकारवत्तुल्यदेहिवच्च शरीरिणाम्॥ (ध्वन्या. ४।१२)

जगत्यस्मिन् बिम्बप्रतिबिम्बयोर्यथा सर्वथैकरूपत्वं तथा द्वयोः कविकर्मणोर्यत्र सम्पूर्णाभिन्नत्वं तत्रैव प्रतिबिम्बवत् संवाद इति समुन्नेयम्। अयमेवार्थो राजशेखरेणाप्युक्तम्। तद्यथा—

अर्थः स एव सर्वो वाक्यान्तरविरचना परं यत्र।

तदपरमार्थविभेदं काव्यं प्रतिबिम्बकल्पं स्यात्॥ (का. मी. पृ. २४२)

The early compositions of the Ṛgveda are not philosophical but these are almost totally obsessed with the problems of physical survival. The Brāhmaṇa texts of the latter period reflects transformation of the literature and also reflects a complete picture of vedic ritual culture. The period of the Brāhmaṇas, according to Eggling' 'source of information regarding one of the most important periods in the social and mental development of India'. In our opinion the ritual culture of the Brāhmaṇa period reflects the admixture of strangers and original inhabitants of India. The archetypal from of culture is more clear in the brāhmaṇa texts in comparison to the Ṛgveda. In the Brāhmaṇa literature in connection with the rituals we find some myths. Myths practically record what man like to think about his past. Mythos is explained as an utterance often a tale recited in an association with religious ceremony. The myth indeed involved archetypal characters, themes and symbols. According to Romila Thapar 'Myth is at one level a straightforward story, a narrative : at another level it reflects the integrating values around which societies are organised. It codifies belief, safeguards morality, vouches for the efficiency of the ritual and provides social norms'. The entire Ṛgveda is based on the myths where rationalisation is found in myth-making. These myths are very much significant for understanding the significance of nature and culture and also their archetypal from. As for example we may take the Yama yamī hymn. Yama, the god of Death and yamī, both of the family of Vivasvat who are both the deities and seers of the hymn. Sāyaṇa explained the mantra of the hymn thus. 'May Prajāpati bestow offspring for the sake of thee becoming the father of a son to be born to us', Prajāpati is taken here as the king of the whole world. From Sāyaṇa's explanation we take it as a myth, but it reflects an archetypal from of social custom. In the earliest stage of Aryan social life here, in India probably for their nomadic character it was common practice to their society to have a marital relation with

the brother and sister. However, at the time of composition and compilation of this sūkta it became illicit and so, yama disagrees even being requested by his sister again and again. This sukta become an archetype of the 'Bhāyāduj' or 'Bhrātridvitiyā', an Indian festival related to brother and sister. The Yajus, the Atharvan, Brāhmaṇas and the Upaniṣads were composed in the land of the Kurus and Pāñchalas. These Kurus and Pāñchalas coincide the major portion of Western uttarpradesh almost the whole of Hariyāna and the neighbouring parts of the Punjāb. From an intensive survey of the culture and languages of the general people of the said area we perhaps can get so many archetypal forms which are reflected in those texts.

Yāska in his Nirukta also expresses his doubt of knowing the meaning of mantras in artificial ways. According to him the vedic learning which is recited aloud as a mechanical prayer is like a dry fuel in a place without fire which never blazes into a flame. Yāska tried his best in his Nirukta to explain 513 words of which 215 from the Ṛgveda in the scientific way of etymology. In fact his Nirukta is the first layout of a mammoth task of understanding the real meaning of vedic poems. In this connection we should notice that there are so many vocables which were obsolete in the days of Yāska. So, in our days if we intend to understand the real meaning of vedas we should know the archetypal forms in every respect. Romila Thapar, a renowned historian expresses her view regarding myth in 'Early Indian Historical Tradition' thus, 'Myths have a widely overarching relationship to all aspects of society and each major myth could be the subject of an expansive analysis'. This is true not only in case of myths but also in case of archetypes. Archetype is to reflect the flow of tradition in language, in literature, in social, political and economic form.

MORPHOPHONEMIC ALTERATIONS IN PĀṆINI'S ŚIVA-SŪTRAS

SATYA RANJAN BANERJEE

The Śiva-sūtras are those sūtras which are generally found at the beginning of the *Aṣṭādhyāyī* of Pāṇini. These sūtras are derived, as the legend goes, from Śiva who, after his dance (*tāṇḍava-nṛtya*) in the *deva-sabhā*, beat his drum fourteen times and got the sūtras. As Pāṇini has got them from Śiva, they are known as Śiva-sūtras.

The Śiva-sūtras are fourteen in number and they are enumerated below :

अ इ उ ण् ॥ १ ॥	*a i u ṇ* ॥ 1 ॥
ऋ लृ क् ॥ २ ॥	*ṛ ḷ k* ॥ 2 ॥
ए ओ ङ् ॥ ३ ॥	*e o ṅ* ॥ 3 ॥
ऐ औ च् ॥ ४ ॥	*āi āu c* ॥ 4 ॥
ह-य-व-र-ट् ॥ ५ ॥	*ha-ya-va-ra-ṭ* ॥ 5 ॥
ल-ण् ॥ ६ ॥	*la-ṇ* ॥ 6 ॥
ञ-म-ङ-ण-न-म् ॥ ७ ॥	*ña-ma-ṅa-ṇa-na-m* ॥ 7 ॥
झ-भ-ञ् ॥ ८ ॥	*jha-bha-ñ* ॥ 8 ॥
घ-ढ-ध-ष् ॥ ९ ॥	*gha-ḍha-dha-ṣ* ॥ 9 ॥
ज-ब-ग-ड-द-श् ॥ १० ॥	*ja-ba-ga-ḍa-da-ś* ॥ 10 ॥
ख-फ-छ-ठ-थ-च-ट-त-व् ॥ ११ ॥	*kha-pha-cha-ṭha-tha-ca-ṭa-ta-v* ॥ 11 ॥
क-प-य् ॥ १२ ॥	*ka-pa-y* ॥ 12 ॥
श-ष-स-र् ॥ १३ ॥	*śa-ṣa-sa-r* ॥ 13 ॥
ह-ल् ॥ १४ ॥	*ha-l* ॥ 14 ॥

The necessity of the Śiva-sūtras lies in the fact that they are required for the formation of the sūtras of Pāṇini. They are used in his grammar for the purpose of metalanguage or technical terms. For example, *ac* means all the vowel sounds and *hal* means all the consonantal sounds, The long vowels are included by the sūtra *aṇudit savarṇasya cāpratyayaḥ* (I.1.69). The *guṇa* and *vṛddhi* are also formed by these Śiva-sūtras. By the two aphorisms *aden guṇaḥ* and *vṛddhir ādaic*—all the *guṇa* vowels (*a*, *e*, *o*) and *vṛddhi* vowels (*ā*, *āi* and *āu*) are included. Similarly this system is to be

followed in all other cases of Pāṇini's metalanguage as found in his *Aṣṭādhyāyī.*

Pāṇini's Śiva-sūtras are the basis of the morphophonemic alterations of his grammatical system. Each technical term (*pratyāhāra*), a system of metalanguage, has indications of how the mechanism of alterations of sounds is operated. Of the whole process of mechanism, only two cases of morphophonemic alterations are described here for illustration: one for the vowel *a* and the other for the use of two *ha-kāras.*

Before taking up these two problems, let us analyse linguistically the arrangement of the Śiva-sūtras.

I. Vowels

It is observed that in the Śiva-sūtras Pāṇini has first described the vowels (from 1 to 4 sūtras) and then the consonants (from 5 to 14 sūtras). The classification is, perhaps, based on the conceptions of sounds which have no obstruction or contact, or which have contact or obstruction in the mouth. The vowels have no contact or obstruction in the mouth and therefore are enumerated first, whereas, the consonants have contacts or obstructions in the mouth and therefore are described after the vowels. In the vowels again first the simple vowels (*a, i, u, ṛ, ḷ*) and then the diphthongs (*e, āi, o, āu*) are enumerated. Among the simple vowels again first he has described the velar (= *a*), then palatal (= *i*) and then labial (= *u*) following their places of articulation, beginning from the velar down to the labial, and they are arranged in accordance with the conception of the front and back vowels.

In the Śiva-sūtras Pāṇini has not mentioned the long vowels (= *ā, ī, ū, ṝ, ḹ*) corresponding to their simple short vowels, the reason being that in the body of his *Aṣṭādhyāyī* there is a sūtra—*aṇudit savarṇasya cāpratyayaḥ* (Pā. 1.1.69) which simply means that the sounds (or vowels) which are homogeneous by belonging to the same place of articulation and the effort are to be included, though not mentioned in the Śiva-sūtras. So in the sūtra *a i u ṇ*, *a* stands for both short *a* and long *ā*, so also *i* for both short *i* and long ī, and also *u* for short *u* and long *ū*.

Then come the sonants *ṛ ḷ* which also include both long and short. They are called sonants because they are consonants turned into vowels. Of the sonants the cerebral *ṛ* comes first, then the dental *ḷ* again in accordance with their places of utterance,

Next come the diphthongs. Among the diphthongs the guṇated vowels *e, o* (which were originally clear diphthongs *ai* and *au*) come first and then the diphthongs in lengthened grade (*āi* and *āu*). The reason that the *e* and *o* vowels precede the *āi* and *āu* vowels is because of the fact that the less open (*vivṛta*) comes first and then the more open.

II. Consonants

After describing the vowels, Pāṇini has given the consonants. Among the consonants the semi-vowels (Nos. 5-6) come first, because they are between the consonants and the vowels, and they are also arranged in accordance with their place of utterance corresponding to the front and back vowels.

Then come the nasals (No. 7). Though the nasals are voiced sounds, they are devoid of aspiration and non-aspiration question, and as a result, they are described first before the plosives (or mutes). And of the mutes first the voiced aspirates (Nos. 8-9) and then the voiced unaspirates (No. 10), then the voiceless aspirates (No. 11) and unaspirases (Nos. 11-12). Last come the spirants (Nos. 13-14) which have partial contacts in the mouth. In spirants again, the sibilants are also arranged in accordance with the place of utterance : first palatal, then celebral and lastly dental. The aspiration *h* comes last. Of the two *h*'s again one is voiceless and the other is voiced.

Among the consonant sounds the voiced sounds are described first, because the prominence is given by Pāṇini in accordance with the obstruction of the outgoing breath in the larynx. The *ghoṣa* sounds (i.e. voiced) are those where the obstruction of the outgoing breath in the larynx is not narrowed down by the glottis, whereas in the *aghoṣa* (i.e. voiceless), the obstruction of the outgoing breath in the larynx is narrowed down by the glottis. The result of these two processes lies in the fact that after the voiced sound, the consonantal quality of the voiced can be elided, whereas in other cases in the *aghoṣa*, this is not prominent. That is why in MIA we see that the voiceless sounds are changed into the voiced one and then the voiced quality is lost in Prakrit in particular ; e.g., Skt. *kāka* > *kāga* > *kāa*, *eka* > *ega* > *ea* and of the voiced and voiceless sounds the aspirates come first and then the unaspirates which take less breath.

So the Śiva-sūtras can be arranged in accordance with the present system of the science of language in the following manner.

The table below is taken from Taraporewala's Elements of the Science of Language with slight modification.

Linguistic description of sounds	Voiceless aghoṣa					Voiced ghoṣa					Śiva-sūtras
	Velar	Pal	Cere	Den	Labi	Velar	Pal	Cere	Den	Labi	
A. No obstruction in mouth :											
Vowels : short & long											
(i) *Pure Vowels* :											
(a) Fundamental						अ आ					
(b) Front							इ ई				
(c) Back										उ ऊ	अइउण् ॥ १ ॥
(ii) *Sonants* : liquids								ऋ	ऌ		ऋऌक् ॥ २ ॥
(iii) *Diphthongs* :											
(a) guṇa							ए			ओ	एओङ् ॥ ३ ॥
(b) vṛddhi							ऐ			औ	ऐऔच् ॥ ४ ॥
B. Obstruction in mouth :											
1. *Semi-vowels.*											
a) Front							य				
(b) Back										व	(ह)-यवरट् ॥ ५ ॥
(c) Liquids								र	ल		लण् ॥ ६ ॥
2. *Implosives* : (sparśa-varṇa)											
(a) Nasals						ङ	ञ	ण	न	म	ञमङणनम् ॥ ७ ॥
(b) Voiced											
(i) *aspirates* :						घ	झ	ढ	ध	भ	झभञ् । घढधष् ॥ ८-९ ॥
(ii) *unaspirates* :						ग	ज	ड	द	ब	जबगडदश् ॥ १० ॥
(c) Voiceless											
(i) *aspirates* :	ख	छ	ठ	थ	फ						खफछठथ-
(ii) *unaspirates* :	क	च	ट	त	प						चटतव् ॥११॥ कपय् ॥१२॥
3. *Spirants (ūṣman)*											
Voiceless aspirates	(: χ)	श	ष	स	(: φ)						शषसर् ॥ १३ ॥
4. Aspiration	: (ḥ)					ह					हल् ॥ १४ ॥

After discussing linguistically the nature of the arrangement of the Śiva-sūtras, let us consider the two problems indicated before.

III. Is अ saṃvṛta or vivṛta in the Śiva-sūtras ?

One thing is to be observed in these four Śiva-sūtras that Pāṇini has arranged the vowels (perhaps following the traditional system of Sanskrit alphabet) in accordance with the necessity of the vowels to be used in the system of ablaut or vowel gradation (*guṇa, vṛddhi* and *samprasāraṇa*). The *i, u, ṛ ḷ* are normally taken as the radical vowels which are normally in the weak grade of the ablaut system, and then corresponding guṇated forms *e* and *o* (*aden guṇaḥ*) come next in order and then the lengthened grade *āi* and *āu* (*vṛddhir ādaic*). With regard to *a*, Pāṇini has mentioned it first perhaps, because the place of utterance of *a* is velar which precedes the palatals and naturally *a* is separated from the other two guṇated vowels. Below is shown the arrangement of the vowels in accordance with the system of the ablaut or vowel gradation :

Series	Normal/strong grade guṇa (*aden guṇaḥ*)	lengthened grade vṛddhi (*vṛddhir ādāic*)	weak grade: secondary accent	weak grade: accentless		*ig yaṇaḥ samprasāraṇam*
a-series	a	ā	*i*(<*ə)	—		
	e (ay)	āi (āy)	ī	i	←	y
	o (av)	āu (āv)	ū	u		v
	aṛ	ār	ir (īr) ur (ūr)	ṛ		r
	al	āl	—	ḷ		l
	an	ān	in (*ən)	a (<*n̥)		n
	am	ām	im (<*əm)	a (<*m̥)		m
ā-series	ā	—	a, i (<*ə)	—		
	āi (āy)	—	ī, e, (ay)	i		y
	āu āv)	—	ū, o, (av)	u		v

Although the traditional grammarians might think that *a* at the beginning of the sūtra as well as at the beginning of the book *Aṣṭādhyāyī* is used for the sake of auspiciousness and for the uninterrupted ending of the book, the linguistic attitude seems to be different. It is here a problem is raised as to the sound value of '*a*' mentioned first in the Śiva-sūtra. It is generally known that '*a*' and '*ā*' are fundamental vowels, and '*a*' is the short

form of '*ā*'. But it appears from the sūtras of Pāṇini that perhaps at the time of Pāṇini '*a*' became a mixed vowel. If then, what is the sound value of this 'a'? Does Pāṇini recognize, in any way, any other '*a*'? The following analysis might help us to get the answer of this question.

So far as the orthographic representation of the Sanskrit sound अ is concerned, we have only one '*a*' which is normally believed to be as short '*a*' आॅ (= ʌ) which is similar to the English pronunciation of *u* in but (= *bʌt*) and whose lengthened form is long *ā*. But in the last sūtra—a a iti (VIII.4.68), Pāṇini has mentioned another '*a*'. It may be believed then that Pāṇini has meant two '*a*'s used in Sanskrit language, at least, current in his time, of which one might be a dialectal form. And what is the nature of that '*a*'? The commentators of Pāṇini have helped us in this respect.

The commentators say that one '*a*' is *saṃvṛta*, i.e., what we term as 'close', pronounced as a short *ǎ* perhaps with rounded lips (= ɔ). These two '*a*'s, according to Pāṇini, are not homogeneous (i.e. not belonging to the same class). The application of these two 'a's is found in the chapter of Sandhi and morphology. We have a regular sandhi between *a* + *a* or *a* + *ā* etc. by the aphorism *akaḥ savarṇe dīrghaḥ* (VI.1.101) as these two *a*'s are homogeneous, i.e., their place of utterance and the effort of articulation are the same, so we get the sandhi with the words *deva* + *ālaya* as *devālaya* (*prakriyā-daśāyāṃ tu vivṛtam eva*). But if the two *a*'s are not homogeneous, then we cannot have a sandhi, because there cannot be any homogeneity between these two sounds—one being *saṃvṛta* and the other *vivṛta*. So where can we find this *saṃvṛta* (= close) '*a*'?

We know that the vocatives of a word ending in '*a*' cannot have any Sandhi with '*a*' vowel following it, e.g; in the sentence *ehi Kṛṣṇa atra gāus carati*, we cannot have any sandhi of the final *a* of Kṛṣṇa with the following *atra* (cf. *pluta-pragṛhyā aci nityam* VI.1.125), as it is *plūta*. In fact, this prohibition of Sandhi may be due to the fact that the final '*a*' of Kṛṣṇa in the vocative is a close one (*saṃvṛta*). It is possible that when a word ends in '*a*' in a vocative, then that '*a*' at the end could be a *saṃvṛta* one (i.e. the position of lips is a round-shaped one as represented by the phonetic symbol ɔ). Normally the vowels in the vocative case are supposed to be pluta (*dūrāhvāne ca gāne ca rodane ca pluto mataḥ*) and if the pronunciation is pluta, i.e. if *a* in a vocative sg. is *vivṛta*, then the pronunciation will be long *Kṛṣṇā3*, as if, it is plural. And it will

create a confusion as to its number. Hence the prohibition of Sandhi. That *visarga* is elided in the vocative sg. after the *a*-base is also significant in this case.

That there is no Sandhi with *yajña + am = yajñam*, Avestan *yasnəm* instead of **yajñām* is another case where we can trace the existence of *saṃvṛta a*. The *a* of *-am* (IE* *m* before vowels, e.g., IE**om* = Skt. *-am*, Av. *-əm*, OP. *-am*, and *ṃ* after consonants) might be different from the final *a* of *yajña*. So also *bhara + anti* = Skt. *bharanti*, Av. *barənti* instead of **bharānti* (cf. IE unaccented **nti* added to a thematic vowel and IE accented *énti* added to a non-thematic vowel). The fact that Sanskrit *a* before *n* or *m* often corresponds to Avestan *ə*, (e.g., Skt. *ūpamam* = Av. *upəməm*/ *upaməm*, Skt. *santi* = Av. *hənti*, Skt. *avindan* = Av. *vindəm*) may indicate that the Sanskrit *a* in those cases might be different from the standard *a* or *ā* where Sandhi is possible. I believe that the existence of this kind of *saṃvṛta a* could be traced in those cases where Pāṇini has the sūtra *ato guṇe* (VI.1.97) which simply means :

"When an *a* (probably the short ă), when not final in a *pada*, is followed by a *guṇa* vowel (here it is *a*), then the result is the single substitute of both the *a's* (i.e., the preceding and the subsequent *a*) ; in other words, they both coalesce, and as a result the sūtra *akaḥ savarṇe dīrghaḥ* (VI.1.101) is not applicable there.

To trace back the history of this short close ă (= ɔ), one can say that Sanskrit might have inherited this close (*saṃvṛta*) *a* from Indo-Iranian ə as it is represented in the Avestan (cf. also Skt. ṛ = Av. *ərə*). And before it is established in Sanskrit, it is lost even in the early stage of the Vedic language. Though this phenomenon was known to Pāṇini, he did not record them in the Śiva-sūtra in order to avoid the complication of Sanskrit alphabet, or the Sanskrit alphabet अ might have represented both *saṃvṛta* and *vivṛta* vowel.

IV. Two h's in the Śiva-sūtras

With regard to the two *h*'s in the Śiva-sūtra, the Sanskrit grammarians have defended Pāṇini by quoting a couplet which runs as follows :

> *ha-kāro dvir upātto'yam aṭi śalyapi vāñchatā* /
> *arheṇādhukṣad ityetad dvayaṃ siddhaṃ bhaviṣyati* //

The application of the two *h*'s, as given in the Śiva-sūtra, is,

therefore, found for twofold grammatical purposes for the technical terms as shown below :

The first h for

aṭ, aś, haś, iṇ

(1) aṭ = *arheṇa* (by *aṭ ku-pvāṅ-numṃ vyavāye'pi* VIII. 4.2.)

(2) aś = *devāḥ* + *hasanti* = *devā hasanti* (by *bho-bhago-agho-apūrvasyā yo' śi* VIII. 3.17)

(3) haś = *devaḥ* + *hasati* = *devo hasati* (*haśi ca* VI. 1.114.)

(4) iṇ = *lilihidhve*/*lilihiḍhve* (*vibhāṣeṭaḥ* VIII. 3. 79)

[The cerebral sound is optionally substituted for the *dh* of *ṣīdhvam* and of the aorist and the perfect after the augment *iṭ* when the stem ends in *iṇ*.]

where *iṇ* comes from (*iṇaḥ ṣīdhvaṃ luṅ-liṭāṃ dho' aṅgāt*. VIII. 3.78)

The second h for

val, ral, jhal, śal

(1) val = *svapihi* (*ārdha-dhātu-kasyeḍ valādeḥ* VII. 2.35)

(2) ral = *snihitvā*/*snehitvā* (*ralo vyupadhād halādeḥ saṃśca* I. 2.26)

(3) jhal = *adāgdhām* (*jhalo jha-li* VIII. 2.26)

(4) śal = *alikṣat* (*śala ig upadhād aniṭaḥ ksaḥ* III. 1.45)

According to the description of the Sanskrit grammarians *h* is velal (*kaṇṭhya*), voiced (*ghoṣa*) and spirant (*ūṣman*) and it has a partial contact (*īṣat-pṛṣṭa*). The history of *h* says that it has been a breathing sound in India, and the evidence of the borrowing of the Greek words by the Indians also shows that it was a breathing sound, for example, ὠ'ρα = Skt. *horā*. Gk. η''λιος = Skt. heli-. It is remarkable to note that in the TP (*ha-kāro ha-caturtheṣu* II. 9) it is described as a voiced aspirate together with *gh*, *dh* and *bh*. So also in RP (I. 12 ; XII. 2) and AP (I. 13). That *h* is a breathing sound is also proved by the fact that *h* is derived from voiced aspirates, *dhā* → *hita* ; *han* → *jaghāna* ; *tad-hi* → *tad-dhi*.

The history of the origin of *h* also demonstrates this position of *h* as a breathing sound. From the historical point of view, we know that *h* has come from

(1) IE palatal voiced aspirate : IE* ĝh→IIr. žh→Skt. *h*, Av *z̨*.

(2) IE velar and labio-velar voiced aspirates before palatal vowels : **gh*→Skt. *h* ; **g̯uh*→Skt. *h*.

(3) Sometimes dental voiced aspirate **dh*>Skt. *h*.

(4) Labial voiced aspirate *bh*>Skt. *h*.

For examples :

IE* *ĝh* : **eĝhom*>Skt. *aham*, Av. *azəm*
**ĝhansós*>Skt. *haṃśas*, cf. Gk. *χη'ν*, Lat. *anser*.

IE* *gh* : **dhrughes*>Skt. *drúhas*, cf. Skt. *druhyāmi*, Av. *druj*- OHG. *triogan*.

**g̯uh* : **g̯uhenmi*>Skt. *hánmi*, cf. Gk. *θεί'νω*.
**g̯uheros*>Skt. *háras*, Gk. *θε'ρος*.
**g̯uheg̯uhóna*>Skt. *jaghana* (Vedic).

It is because of this reason we often get interchanges between *h* and other voiced aspirates, such as, *dh* and *h*, and *bh* and *h* : for example, *idha* : *iha*, *gāha* : *gādha*, *rodhati* : *rohati*, *dhita* : *hita*. And also *bh* and *h* : *bharāmi* : *harāmi* (I bear), *gṛbhnāmi* : *gṛhnāmi*, *grabh* : *grah*, *gṛbh* : *gṛha*, *kakubh* : *kakuh*.

The sūtras of Pāṇini which regulate the changes of *h* and voiced aspirates are as follows :

h : gh = *dāder dhātor ghaḥ* (VIII.2.32), i.e., the *gh* is substituted for *h* of a root beginning with *d* before a *jhal* letter; e.g., *dah* + *tvā* = *dagh* + *tvā* = *dag* - *dhvā* (<**dagh* - *dhvā*), cf. Bartholomae's Law (cf. also Pā. *jhaṣas tathor dho' dhaḥ*. VIII. 2.40). So also
druh—drogdhā, *droḍhā*,
muh—mogdhā, *moḍhā*,
ṣṇuh—snogdhā, *snoḍhā*
ṣṇih—snegdhā, *sneḍhā*,
by *vā druh-muh-ṣṇuh-ṣṇihām* (VIII.2.33).

h : ḍh = *ho ḍhaḥ* (VIII.2.31), i.e., *ḍh* is substituted for *h* before a *jhal* letter or at the end of a word ; e.g., *sah—soḍhā* ; *vah—voḍhā*.

h : th = *āhas thaḥ* (VIII.2.35), i.e. the *h* of *āh* is changed into *th* before a *jhal* latter ; e.g., *idam āttha*, *kimāttha*.

h : dh = *naho dhaḥ* (VIII.2.34), i.e, the *h* of *nah* is changed into *dh* before a *jhal* letter ; e.g., *nah* + *tvā* 〉 *nadh* + *tvā* 〉 *naddhvā*.

There is another type of aspirate which is unvoiced aspirate as represented by the *visarga* of Sanskrit. This *visarga* is a voiceless breathing and is used after the vowels, and this is represented by Indian alphabet as : (*visarga*) = ḥ as in English *h*, and this unvoiced aspirate differs from Skt. *h*. Sanskrit grammarians have recognised other two types of unvoiced spriant aspirates represented by *jihvāmūliya* (velar spirant or chest-sound by RP)

and the *upadhmānīya* (= labial spirant). This can be shown in the following diagram.

unvoiced h

The Sanskrit : *visarga* (ḥ) is an unvoiced aspirate and its place of utterance is *kaṇṭhya* (velar) cf. *a-ku-ha-visarjanīyānāṃ kaṇṭhyaḥ*).
The *jihvā-mūlīya* is a velar spirant as represented by :k/kh = χ ; e.g., *antaḥkaraṇa* (= *antaχkaraṇa*).
The *upadhmānīya* is a labial spriant as represented by :p/ph = ϕ ; e.g., *antaḥpura* (= *antaϕpura*)

voiced ɦ

The voiced h (to be represented by ɦ) is a breathing sound and its place of utterance is *kaṇṭha* (velar).

This phenomenon is also attested by the Bengali language where both the aspirates are prevalent. A comparative table will clear the point.

unvoiced h	voiced ɦ
= Sanskrit : (= ḥ) = visarga cf. Eng. h as in happy, hat.	= Sanskrit h. Hindi preserves this ɦ.
(1) Not in the initial position	(1) Initially : *hoy, hāt, hita, he, hukum* etc.
(2) Medially can be used when as a part of the unvoiced aspirate, as, *duḥkha*	(2) Medially this voiced h can be weak, and as a result can be elided as in Bengali, phalāhāra > phalāāra > phalāra vadhu > vahū > bau > bau̯.
(3) The unvoiced h can be used only finally in exclamatory and adverbial words ; e.g. aḥ > aχ ; iḥ > iʃ ; uḥ > uϕ ; oḥ > oϕ ; eḥ > eʃ.	(3) Cannot be used finally, unless accompanied by vowels.
	(4) Semivowels + h = h is elided

Coming back to the original couplet of the Sanskrit verse, we can say that except in two cases (*aṭ* and *iṇ*), the first *h* is mainly applicable to the *visarga* sandhi, rather than in other cases. I probably assume that this *h* is a representative of visarga sandhi, otherwise known as breathing sound, which undergoes changes in sandhi, whereas the other one is a replacement between the voiced aspirates and *h*.

The various origins of *h* (or rather breathing sound aspirates) and their pronunciations have confused us as to the nature of the two *h*'s in Pāṇini's Śiva-sūtras.

Bibliography

Hannes Sköld—Papers on Pāṇini and Indian Grammars in general, Lund, Gleerup, 1926, pp. 8-22 (for Śiva-sūtras).

K.A. Subramania Iyer—On the fourteen Maheśvara-sūtràs, PAIOC, Allahabad, 1926, pp. 133-43.

Barend Faddegon—The Mnemotechnics of Pāṇini, *Acta Orientalia*, Vol. VIII, 1929, pp. 48-65.

K.C. Chatterji—The Śiva-sūtras, Journal of the Department of Letters, Calcutta University, 1934. 24.2, pp. 1-10.

— —The Śiva-sūtras and the Sanskrit Alphabet, Mañjūṣā, Vol. V, No. 8, 1950-51, pp. 1-30.

Paul Thieme—Pāṇini and the Veda ; studies in the early history of linguistic science in India, Allahabad, Globe Press, 1935.

Sten Konow—The authorship of the Śiva-sūtras, *Acta Orientalia*, Vol. 19, 1943, pp. 291-328.

Johan Frederik Staal—A method of linguistic description : the order of consonants according to Pāṇini, Language, Vol, 38, 1962, pp. 1-10.

George Cardona—On Pāṇini's morphophonemic principles, Language, Vol. 41, 1965, pp. 225-38.

Hartmut Scharfe—Pāṇini's Metalanguage, Philadelphia, 1971.

कविकुलगुरु—

श्रीकालिदासीयच्छायाकाव्यं

कुमारसम्भवीयं

मदनदहनमधिकृत्य ।

—श्रीसुखमयमुखोपाध्यायः

श्रुताप्सरोगीतिरपि क्षणेऽस्मिन् हरः प्रसंख्यानपरो बभूव ।
आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति ॥१॥
तपस्विनां यो नियतेन्द्रियाणां तपःफलं मोक्षपदं विधाता ।
मनो मनस्याहितवश्यवृत्तेः कस्तस्य हर्तुं प्रभवेद् हरस्य ॥ छाया ॥
लतागृहद्वारगतोऽथ नन्दी वामप्रकोष्ठार्पितहेमवेत्रः ।
मुखार्पितैकाङ्गुलिसंज्ञयैव मा चापलायेति गणान् व्यनैषीत् ॥२॥
तस्य प्रभावेन ततो वनान्ते तपोवनाङ्के परिभूय तस्मिन् ।
शरीरचेष्टादिमुदग्ररूपं स्वल्पोऽपि जन्तोर्विरराम शब्दः ॥ छाया ॥
निष्कम्पवृक्षं निभृतद्विरेफं मूकाण्डजं शान्तमृगप्रचारम् ।
तच्छासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे ॥३॥
योगेश्वरस्य स्थिरनिश्चयस्य सान्निध्ययोगात् परमेश्वरस्य ।
तस्मिन् क्षणे सा विरराज भूयः समाधिमग्नेव तपोवनश्रीः ॥ छाया ॥
दृष्टिप्रपातं परिहृत्य तस्य कामः पुरःशुक्रमिव प्रयाणे ।
प्रान्तेषु संसक्तनमेरुशाखं ध्यानास्पदं भूतपतेर्विवेश ॥४॥
अदृश्यमात्मानमुपस्थितं स पश्यंस्तुतोष व्यवधाय कायम् ।
को देवदेवं प्रसहेत वीरः पुरोऽनलश्च ज्वलदर्चिरुग्रम् ॥ छाया ॥
स देवदारुद्रुमवेदिकायां शार्दूलचर्मव्यवधानवत्याम् ।
आसीनमासन्नशरीरपातस्त्रियम्बकं संयमिनं ददर्श ॥५॥
देवेषु देवाधिकवीर्य्यवन्तमतो महादेव इति प्रसिद्धम् ।
अध्यानवद्याङ्गविलासशोभं केनापि कामेन तपश्चरन्तम् ॥ छाया ॥
पर्य्यङ्कबन्धस्थिरपूर्वकायमृज्वायतं सन्नमितोभयांसम् ।
उत्तानपाणिद्वयसन्निवेशात् प्रफुल्लराजीवमिवाङ्कमध्ये ॥६॥

वीरासनप्रायमभीष्टमाहुर्यदासनं ध्यानवतां मुनीनाम् ।
तं ध्यानवीराग्रसरं वरेण्यं तेनैव वीरासनगाढ़बन्धम् ।। छाया ।।
भुजङ्गमोन्नद्धजटाकलापं कर्णावसक्तद्विगुणाक्षसूत्रम् ।
कण्ठप्रभासङ्गविशेषनीलां कृष्णत्वचं ग्रन्थिमतीं दधानम् ।।७।।
यो नीलकण्ठप्रभवामभिख्यां बभौ च बिभ्रन्महिमानुविद्धाम् ।
भास्वन्महाभस्मसिताङ्गरागं तमेव योगेश्वरयोग्यसंज्ञम् ।। छाया ।।
किञ्चित्प्रकाशस्तिमितोग्रतारैर्भ्रूविक्रियायां विरतप्रसङ्गैः ।
नेत्रैरविस्पन्दितपक्ष्ममालैर्लक्ष्यीकृतघ्राणमधोमयूखैः ।।८।।
भ्रूभङ्गदुष्प्रेक्ष्यमुखोऽपि तावद् रोषेण यो भीषणतामुपैति ।
तमेव गाम्भीर्य्यविशेषभाजा समाधियोगेन विराजमानम् ।। छाया ।।
अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम् ।
अन्तश्चराणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम् ।।९।।
निरुद्धनिःशेषतपःप्रभावमग्निं यथा प्रागनभिज्वलन्तम् ।
रुद्राभिधानञ्च विनापि रोषं लोकान् समग्रानभितापयन्तम् ।। छाया ।।
कपालनेत्रान्तरलब्धमार्गैर्ज्योतिःप्ररोहैरुदितैः शिरस्तः ।
मृणालसूत्राधिकसौकुमार्य्यां बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः ।।१०।।
आलोकनिस्यन्दमनिन्द्यलेखं निस्यन्दयन्तं नयनात् तृतीयात् ।
अलोकसामान्यसमाधिमग्नं स्वनेत्रदुर्लक्ष्यमिव त्रिनेत्रम् ।। छाया ।।
मनो नवद्वारनिषिद्धवृत्ति हृदि व्यवस्थाप्य समाधिवश्यम् ।
यमक्षरं वेदविदो विदुस्तमात्मानमात्मन्यवलोकयन्तम् ।।११।।
योगेन योगेश्वरमन्यरूपं शिवस्वरूपं समतीत्य शान्तम् ।
जाज्वल्यमानं प्रसरद्भिरन्यैस्तेजोभिरापूर्य्य जगत् समग्रम् ।। छाया ।।
स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाऽप्यधृष्यम् ।
नालक्षयत् साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात् ।।१२।।
दृष्टोऽपि कामः स निकामभीतः क्षणं विमूढ़ो न विवेद किञ्चित् ।
को रुद्ररोषान्न बिभेतु वीरस्तमग्रतो लङ्घयितुं प्रवृत्तः ।। छाया ।।
निर्वाणभूयिष्ठमथास्य वीर्य्यं सन्धुक्षयन्तीव वपुर्गुणेन ।
अनुप्रयाता वनदेवताभ्यामदृश्यत स्थावरराजकन्या ।।१३।।

सा कन्यकापुण्यकुलाधिवासा वामासु बालापि समृद्धरागा ।
शुश्रूषया तत्क्षणमिन्दुमौलेः समागता श्रीरिव शोभमाना ।। छाया ।।
अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युतिकर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ।।१४।।
केशेषु विन्यस्तनवप्रवालं प्रकीर्णतत्तत्कुसुमोपचारम् ।
कण्ठे च सौभाग्यमयं दधाना बाह्वोश्च सम्यग् ग्रथिताग्र्यमाल्यम् ।। छाया ।।
आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
पर्य्याप्तपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव ।।१५।।
लावण्ययोगेन विलोभनीया कान्त्या मनोज्ञैश्च विभूषणैः सा ।
आहार्य्यदोषं दृढमाक्षिपद्भिर्निसर्गसौन्दर्य्यमिवाधिरूढा ।। छाया ।।
स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केशरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ।।१६।।
प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमाक्षिपन्ती ।
पदे पदे बाणमिव स्मरस्य निर्वाणलब्धेः प्रतिपक्षभूतम् ।। छाया ।।
सुगन्धिनिश्वासविवृद्धतृष्णं बिम्बाधरासन्नचरं द्विरेफम् ।
प्रतिक्षणं सम्भ्रमलोलदृष्टिर्लीलारविन्देन निवारयन्ती ।।१७।।
ततः सखीभ्यामनुगम्यमाना देवाधिदेवं बहु भावयन्ती ।
शुचिस्मिता रागवशात् क्रमेण तमभ्यगच्छद् द्रुतविक्रमेण ।। छाया ।।
तां वीक्ष्य सर्वावयवानवद्यां रतेरपि ह्रीपदमादधानाम् ।
जितेन्द्रिये शूलिनि पुष्पचापः स्वकार्य्यसिद्धिं पुनराशशंसे ।।१८।।
रूपं तदीयं तदवस्थशोभं विभूषणञ्चैव तथाभिरामम् ।
किं हीयते तत्र विलासवत्यां विलोभयेद् यन्नहि देवदेवम् ।। छाया ।।
भविष्यतः पत्युरुमा च शम्भोः समाससाद प्रतिहारभूमिम् ।
योगात् स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम ।।१९।।
स व्युत्थितोऽभूच्च समाधियोगादभ्यागता सा च नगेन्द्रकन्या ।
अन्योऽन्यमभ्यागमयोग्यकालस्तदा विपाकं सहसाऽऽजगाम ।। छाया ।।
ततो भुजङ्गाधिपतेः फणाग्रैरधः कथञ्चिद् धृतभूमिभागः ।
शनैः कृतप्राणविमुक्तिरीशः पर्य्यङ्कबन्धं निबिडं बिभेद ।।२०।।

पुण्ये मुहूर्त्ते किल चन्द्रमौलेस्तस्मिन्नुमायाश्च समागमोऽभूत् ।
चिरानुबन्धः कथमन्यथा स्यात् परस्परस्योपरि रागबन्धः ।। छाया ।।
तस्मै शशंस प्रणिपत्य नन्दी शुश्रूषया शैलसुतामुपेताम् ।
प्रवेशयामास च भर्त्तुरेनां भ्रूक्षेपमात्रानुमतप्रवेशाम् ।।२१।।
आरुह्य योगस्य परामवस्थां योगेश्वरः शान्तमना बभूव ।
तस्मिन् क्षणे स्त्रीकथयापि तावद् मनोऽस्य नातिप्रससाद शम्भोः ।। छाया ।।
तस्याः सखीभ्यां प्रणिपातपूर्वं स्वहस्तलूनः शिशिरात्ययस्य ।
व्यकीर्य्यत त्र्यम्बकपादमूले पुष्पोच्चयः पल्लवभङ्गभिन्नः ।।२२।।
सखीकराभ्यां कुसुमोपहारं सपल्लवं तत्क्षणमीश्वराय ।
सरागभक्तिप्रवणञ्च चित्तं न्यवेदयत् सैव गिरीन्द्रपुत्री ।। छाया ।।
उमापि नीलालकमध्यशोभि विस्रंसयन्ती नवकर्णिकारम् ।
चकार कर्णच्युतपल्लवेन मूर्द्धना प्रणामं वृषभध्वजाय ।।२३।।
तेन प्रणामेन दयार्द्रचेताः सभक्तिपुण्यप्रसरेण देवः ।
उमाभिधायां निजपूर्वपत्न्यां तुतोष तस्यां परमाशुतोषः ।। छाया ।।
अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन ।
न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम् ।।२४।।
स वर्द्धयामास समृद्धयोगस्तपोभिराशीर्वचनेन चैनाम् ।
आत्मानमागामिसमागमेन तस्याश्च सम्पूर्णमनोऽभिलाषम् ।। छाया ।।
कामस्तु वाणावसरं प्रतीक्ष्य पतङ्गवद् वह्निमुखं विविक्षुः ।
उमासमक्षं हरबद्धलक्ष्यः शरासनज्यां मुहुराममर्श ।।२५।।
ज्याकर्षणेनैव मनोहरेण किं क्षोभयिष्यामि हरस्य चित्तम् ।
इति स्वचिन्ताविधुरः स कामस्तस्मिन् मुहूर्त्ते क्षुभितोऽवतस्थे ।। छाया ।।
अथोपनिन्ये गिरिशाय गौरी तपस्विने ताम्ररुचा करेण ।
विशोषितां भानुमतो मयूखैर्मन्दाकिनीपुष्करबीजमालाम् ।।२६।।
शुश्रूषया केवलया न वाला प्रैक्षापि तां ध्यानजपस्य मालाम् ।
दिदेश दिष्ट्यैव न वेद सम्यक् किं ध्येयवस्तु प्रभुणा विधेयम् ।। छाया ।।
प्रतिग्रहीतुं प्रणयिप्रियत्वात् त्रिलोचनस्तामुपचक्रमे च ।
सम्मोहनं नाम च पुष्पधन्वा धनुष्यमोघं समधत्त वाणम् ।।२७।।

सोऽवेक्ष्य कालावसरं शरस्य लोकेषु धीरेष्वपि मोहहेतुः ।
प्रसह्य लोकोत्तरभाजनेऽस्मिन् सम्मोहसन्धानपरो बभूव ॥ छाया ॥
हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि ॥२८॥
निर्मोहचित्तप्रसरोऽपि तस्या मनोज्ञरूपेण निरुद्धसत्त्वः ।
तस्मिन् क्षणे प्रेमवशादुमायां कुतूहलेनेव समाकुलोऽभूत् ॥ छाया ॥
विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन । २९॥
तद्भावभङ्गीप्रभवैर्विशेषैर्विशेषभावाहितबुद्धिरीशः ।
आरूढयोगस्य विभेदशङ्कां प्रमार्ष्टुमैच्छत् किल लेशतोऽपि ॥ छाया ॥
अथेन्द्रियक्षोभमयुग्मनेत्रः पुनर्वशित्वाद् बलवन्निगृह्य ।
हेतुं स्वचेतोविकृतेर्दिदृक्षुर्दिशामुपान्तेपु ससर्ज दृष्टिम् ॥३०॥
सर्वं स जानन्नपि भङ्गहेतुं साक्षादजानन्निव तत्समाधेः ।
सर्वात्मना रोषवशाद् वशिष्ठः सर्वत्र नेत्रत्रितयं दिदेश ॥ छाया ॥
स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥३१॥
अभ्यर्णमभ्युद्यतपञ्चबाणं दृष्ट्वा तथाभूतमभीतरूपम् ।
अमुष्य शिक्षार्थमुमारतेश्च विशुद्धिरक्षार्थमसौ प्रवृत्तः ॥ छाया ॥
तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य ।
स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥३२॥
योऽग्निः स्वयोगाग्निरिव प्रवृद्धस्तपोभिरुग्रैः प्रबभूव शम्भोः ।
स एव साक्षान्नयनात् तृतीयाद् ज्वालारुणस्तत्क्षणमुच्चचार ॥ छाया ॥
क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुताञ्चरन्ति ।
तावत् स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनञ्चकार ॥३३॥
जज्वाल वह्निर्ज्वलतां पुरोगः पुरोगतश्चैव तथाधिरूढम् ।
आरूढयोगस्य कपालवृत्तिः कामं स कामं स्ववशं निनाय ॥ छाया ॥
तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम् ।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥३४॥

सखा मधुर्विद्रुत एव तावद् रतिश्च भूमौ गलिता मृतेव ।
अनङ्गमङ्गेन विधाय हीनमहीननामानमसौ चकार ॥ छाया ॥
तमाशु विघ्नं तपसस्तपस्वी वनस्पतिं वज्र इवावभज्य ।
स्त्रीसन्निकर्षं परिहर्त्तुमिच्छन्नन्तर्दधे भूतपतिः सभूतः ॥३५॥
सरागमन्तर्हृदयञ्च तस्यामाकृष्य शम्भुः प्रसभं प्रसह्य ।
काले परीक्षार्थमनन्यसक्तं भावं स तस्यामधिकं पुपोष ॥ छाया ॥
शैलात्मजापि पितुरुच्छिरसोऽभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च ।
सख्योः समक्षमिति चाधिकजातलज्जा शून्या जगाम भवनाभिमुखी
कथञ्चित् ॥३६॥
नष्टेस्वपि स्वविषयेषु तपःफलेषु सा विव्यथे नहि तथा गिरिराजपुत्री ।
प्रेमाभिघातविधुरेण यथेन्दुमौलौ संसर्पिणा बलवता हृदयेन
साध्वी ॥ छाया ॥
सपदि मुकुलिताक्षीं रुद्रसंरम्भभीत्या दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्याम् ।
सुरगज इव विभ्रत् पद्मिनीं दन्तलग्नां प्रतिपथगतिरासीद्
वेगदीर्घीकृताङ्गः ॥३७॥
किमपि किमपि भावं गूढ़माधाय वाला हृदयनिहितमूलं दूरसंस्थेऽपि शम्भौ ।
सह शयनसखीभिस्तत्कथातत्पराभिः कथमपि चिरयामाः सा त्रियामा
निनाय ॥ छाया ॥

निद्रापर-नामक-'सुप्ति'-विषयक-भारतीय-दार्शनिक-तत्त्वप्रतिष्ठं
विद्रूपात्मकम् आधुनिकं
लघुकाव्यं

"सुप्ति-महिम्नः स्तोत्रम्'

—श्रीदीपक घोषः

जाग्रद्दशा सुप्तिदशेति सर्वा द्विधा हि जीवस्य दशा विभक्ता ।
वेदान्तविद्दार्शनिका वदन्ति नास्वीकृतं दार्शनिकैस्तदन्यैः ।।१।।
ज्ञाता तयोः सुप्तिदशेति या च विभज्यते साऽपि पुनः सुषुप्त्या ।
स्वप्नेन चैतन् निखिलैः सुधीभि र्न ह्नूयते दार्शनिक-प्रमुख्यैः ।।२।।
इयं हि सुप्तिर्मम मानसी सा प्रेष्ठत्व-हेतोश्चिर-काम्यमाना ।
सदैव तस्या मधुराङ्कदेशे विश्राम आस्तां मम कामयेऽहम् ।।३।।
पृच्छा यदि स्याद् भवतां कदापि किं-कारणात् सुप्तिरतिप्रिया मे ।
तदा शृणु प्रीतिभरेण वाच्यं सङ्कोचवर्जं कथयामि सर्वम् ।।४।।
सुप्त्यैकपात्रे सरसं पिवामि सुधाद्वयं स्वादु सदा सुगन्धम् ।
भोगः सुधैका ह्यपरा तु योगो भोगेन योगेन सुपूर्ण-पात्रम् ।।५।।
स्वप्ने सुभोगो विविधो विचित्रो जाग्रद्दशायामपि दुर्लभो यः ।
मुद्रा-व्ययो नास्ति तु किञ्चिदत्र तदर्थमास्ते न च काययत्नः ।।६।।
योगः सुषुप्तौ स हि योगनिद्रा दिवौकसां नित्यमहो प्रसिद्धा ।।
अज्ञान-वस्त्रावृत-मात्र-जीव आनन्द-सङ्गं लभतेऽत्र चित्रम् ।।७।।
किञ्चेह किञ्चिद् यदि पातुमिच्छेन् मोक्षञ्च मृत्युञ्च सदैकपात्रे ।
संसार-दुःखात् परिरक्षितुं स्वं विना श्रमं तर्हि स सुप्तिमेतु ।।८।।
संसार-दुःखाग्निविदग्धमूर्द्धा न मोक्षशास्त्रं शरणं व्रजेत्तु ।
आयास-साध्यं न च निश्चितं तत् तस्माद् वरं त्याज्यमिदञ्चिराय ।।९।।
समाश्रयेत् सुप्ति-सरोवरं स संसारदाहप्रशमाय नूनम् ।
ततो निमज्जेत् क्रमशः सुषुप्तौ सुखाकरे शान्तिहिमे प्रदेशे ।।१०।।
क्लान्ताः क्षुधार्त्ता हतभाग्यदीना नैराश्यभिन्नाः पथि भिक्षुका ये ।
सुप्त्यङ्क-संस्थापित-मस्तकास्ते विन्दन्ति निश्चिन्त-निवृत्ति-शान्तिम् ।।११।।
तथैव सुप्तेर्मधुराङ्कदेशे विश्राम-लाभाय सदाकुलोऽस्मि ।
प्रेष्ठे गृहाणैनमयेऽविलम्बं मा वञ्चितं मां कुरु मित्र-सुप्ते ।।१२।।

[काव्यमिदं १९८४ खृष्टाब्दीय-संस्कृतदिवसोत्सवमुपलक्ष्य कलिकाताविश्वविद्यालय-संस्कृतविभागपक्षतः 'द्वारभाङ्गा-हल' कक्षे काव्यकारेण पठितम् ।]

अलंकारप्रयोगसमीक्षा

—श्रीसीतानाथ आचार्यः

काव्यसृष्टेः प्रथमावकाशादेव काव्येन सममलंकाराणां कश्चन निगूढः सम्बन्धोऽस्तीति परिज्ञायते। आर्याणामृषीणां प्रज्ञानेत्रे प्रतिभासमानानि बहून्येव वैदिकसूक्तानि बह्वो मन्त्रराशयो वा समलंकृताः परिदृश्यन्ते। दिङ्मात्रमुदाहरणं यथा—

"रथीव कशयाश्वाँ अभिक्षिपन् आविर्दूतान् कृणुते वर्ष्याँ अह।
दूरात् सिंहस्य स्तनथा उदीरते यत् पर्जन्यः कृणुते वर्ष्यं नभः॥"

—ऋग्वेदः ५-८३-७॥

उपमालंकृतया भाषया अत्र पर्जन्यदेवो वर्ण्यते। सूर्य्यसूक्तेऽपि दृश्यते—
"सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्।"

—ऋग्वेदः १-११५-२॥

अत्र सूर्य्यस्योपमानरूपेण मर्यः अर्थात् मनुष्यः (युवा) तथा उषसः उपमानत्वेन च योषा उपात्तेति अलंकार उपमा। व्यवहारिकजीवने व्यवहृता भाषैव कवेः प्रतिभास्पृष्टया सालंकृतया उक्तया काव्यरूपं विधत्ते। यथोक्तं नीलकण्ठदीक्षितेन शिवलीलार्णवे—

"यानेव शब्दान् वयमालपामो यानेव चार्थान् वयमुल्लिखामः।
तैरेव विन्यासविशेषभव्यैः सम्मोहयन्ते कवयो जगन्ति" ॥१।१३॥

कुतो भवान् समागतः किं वा भवतो नाम इति व्यवहारिकः प्रश्न एव कविकुलहर्षेण श्रीहर्षेण स्वकृतौ नैषधचरिते सालंकृतया भाषया समुपस्थाप्यमानः सहृदयहृदयाह्लादमतितरां करोति। तद्यथा—

"अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य।
त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा॥" ८।२५॥

दूतरूपेण समागतं नलं प्रति दमयन्त्या उक्तिरियम्। भवतः समागमेन वयं कृतार्था इति लौकिक एवार्थः सालंकृतया कविभाषया एवं वर्ण्यते—

"देवधिष्ण्यमिवाराध्यमद्य प्रभृति नो गृहम्।
युष्मत्पादरजःपातधौतनिःशेषकिल्विषम्॥" काव्यादर्शः १।६०॥

विज्ञानदर्शनशास्त्रयोः भाषातः साहित्यिकभाषाया एतदेव वैलक्षण्यं यत् विज्ञानादिशास्त्रेष्वभिव्यक्तेः स्पष्टतैव अपेक्षिता साहित्ये तु अभिव्यक्तेरलंकृतता। शास्त्रीयभाषातः काव्यभाषाया वैलक्षण्यं प्रत्यक्षीकुर्वता कुन्तकेनोक्तम्—

"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि॥" वक्रोक्तिजीवितम् १।७॥

अत्र श्लोके वक्रशब्दार्थं विशदीकुर्वतोक्तम्—'वक्रो योऽसौ शास्त्रादिप्रसिद्धशब्दार्थोपनिबन्धव्यतिरेकी षट्प्रकारवक्रताविशिष्टः'। अरूपो भावराशिः सालंकारप्रकाशविभूत्या अपरूपतां विधत्ते साहित्ये। प्राचीनैरपि संस्कृतालंकारिकैस्तत्त्वमिदं सुष्ठु समनुभूतम्। अतस्तैर्भामहोद्भटदण्डिप्रभृतिभिः काव्येऽलंकाराणां गौरवयुक्तमेव स्थानमुद्घोषितम्। यथा वनिताया वदनं कमनीयमपि अलंकारविरहितं शोभां न जनयति तथा रम्यमपि काव्यमलंकारवियुक्तं न सहृदयहृदयाह्लादनाय प्रभवति। भामहेन यथोक्तम्—'न कान्तमपि निर्भूषं विभाति वनिताननम्'। काव्यालंकारः १।१३॥

अलंकारविरहिता साधारणी उक्तिः भामहस्य मते कथमपि काव्यपदवाच्यतां न गच्छति। आचार्यस्यास्य मते वक्रोक्तियुक्ता भाषैव काव्यभाषा। सैव च वक्रोक्तिः सर्वेषामलंकाराणामुत्सभूता। यथा निगदितम्—

"सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यताम्।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥" भा. का.लं.२।८५॥

अलंकारवियुक्तस्य काव्यत्वस्वीकरणं तथैव उपहासास्पदं यथा उष्णताविहीनस्याग्नित्वाभ्युपगम इत्युक्तं पीयूषवर्षेण स्वकीये चन्द्रालोकग्रन्थे—

"अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती।
असौ न मन्यते कस्मादनुष्णमनलं कृती॥" १।८॥

एवमेभिराचार्यैः काव्ये अलंकाराणां नितरामुपयोग उररीकृतः। एषु पुनः केचित् भङ्ग्यन्तरेणापि अलंकाराणां काव्यात्मत्वं नोररीकृतमिति न। काव्ये अलंकाराणामेतादृशप्राधान्यनिबन्धनमेव काव्यसमीक्षाशास्त्रस्य अलंकारशास्त्रमिति नामकरणं जातमिति नः प्रतिभाति।

तत्रभवता वामनेन अलंकारशब्दस्य व्यापकेऽर्थेऽपि प्रयोगो विहितः। तथाचोक्तं तेन 'सौन्दर्य्यमलंकार' इति। अलंकृतिरलंकार इति भावव्युत्पत्त्या अलंकारशब्दोऽयं काव्यसौन्दर्य्यमेव बोधयति। अतो वामनस्य मते अलंकार-

शास्त्रस्य काव्यसौन्दर्य्यशास्त्रमित्यर्थोऽपि भवितुं युज्यते। अलंक्रियतेऽनेनेति करणव्युत्पत्त्या पुनरलंकारशब्दः उपमादिषु वर्तत इत्यपि वामनेनोक्तम्। 'रीतिरात्मा काव्यस्य' इति रीत्यात्मत्ववादिनापि वामनेन काव्येऽलंकाराणामुपयोगः सुतरामुररीकृतः। तथाचोक्तं तेन—'काव्यं ग्राह्यमलंकारात्'। प्राचीनैरालंकारिकैः काव्येऽलंकाराणामुपयोगे सविशेषं स्वीक्रियमाणेऽपि काव्येन सह तेषामलंकाराणां सम्बन्धो यथार्थतया तैर्नावधारित इति प्रतिभाति। ते हि लौकिकालंकारोपमया काव्यालंकाराणां स्वरूपमवधारयितुं चेष्टितवन्तः। मानवदेहलौकिकालंकारयोः सम्बन्धमतिरिच्यापि काव्यालंकारयोः कश्चन सम्बन्धविशेषो भवितुमर्हतीति न तैः कुत्रापि स्पष्टमुक्तम्। तेषां मते कुन्तलमपसार्य्य कर्णयोर्यथा कर्णिकां संयोजयितुं शक्यते तथा काव्येऽपि अनुप्रासोपमादीनामलंकाराणां यथेच्छं ग्रहणं वर्जनञ्च युज्येते।

संस्कृतसाहित्यसमीक्षाशास्त्रेतिहासे ध्वनिकारस्य आविर्भाव एकः स्मरणीयो वृत्तान्तः। स न केवलं "सत्काव्यतत्त्वनयवर्त्म चिरप्रसुप्तकल्पं मनःसु परिपक्वधियां यदासीत्" तद्ध्वनितत्त्वं व्याकरोत् परन्तु साहित्यसमीक्षाशास्त्रगतानां गुणदोषालंकारादीनां विविधानां तत्त्वानां यथोपयोगं व्यवस्थापनमपि विहितवान्। तद्दर्शितामेव सरणिमनुसृत्य साहित्यसमीक्षा परां काष्ठां गता। पूर्वाचार्य्यकल्पिता अलंकाराणामियं यथेच्छहानोपादानरीतिर्न लौकिके न वा साहित्यिके क्षेत्रे समीचीना इति ध्वनिकृतोऽभिमतम्। लौकिके जगति व्यक्त्यौचित्येन क्रियमाणालंकारयोजना भवति युक्ता। तथाहि तापसानां शरीरे जटावल्कलमेव अलंकरणं न स्वर्णनिर्मितं हाराङ्गुरीयादिकम्, एवमेव काव्यजगत्यपि आत्मभूतस्य रसस्य औचित्यानुसारतः अलंकारोपस्थितिः सौमनस्याय जायते। लक्षितञ्चाप्यत्राभिनवगुप्तेन 'तथाहि कटककेयूरादिभिरपि शरीरसमवायिभिश्चेतन आत्मैव तत्तच्चित्तवृत्तिविशेषौचित्यसूचनात्मतयालङ्क्रियते। तथाहि शवशरीरं कुण्डलाद्युपेतमपि न भात्यलंकार्यस्याभावात्। यतिशरीरं कटकादियुक्तं हास्यावहं भवत्यलंकार्यस्यानौचित्यात्। न च देहस्य किञ्चिदनौचित्यमिति वस्तुत आत्मैवालंकार्य्यः'। [लोचनम् पृ. २०६]।

शिवलीलार्णवे नीलकण्ठदीक्षितेनाप्युक्तम्—

> "अन्योन्यसंसर्गविशेषरम्याप्यलंकृतिः प्रत्युत शोचनीया।
> निर्व्यङ्ग्यसारे कविसूक्तिबन्धे निष्क्रान्तजीवे वपुषीव दत्ता॥" १।३६॥

ध्वनिकारस्य मतेऽलंकारा न कटककुण्डलादिवत् वाह्यिकसंयोज्यमान-प्रसाधनसामग्रीविशेषाः परन्तु काव्यस्यात्मना सहाविच्छेद्यसम्बन्धेन सम्बद्धाः। तस्य मते प्रतिभानवतः रससमाहितस्य कवेश्चेतसि सालंकृतैव भाषा स्वस्याभि-व्यक्तये व्याकुलीभवति ; वाग्देवी स्वयमेव सालंकृता काव्यभाषा तस्मै उपा-यनीकरोति। आदौ अर्थस्योत्पत्तिस्ततः अलंकारयोजना इति तु न। तथा चोक्तं तेन—

"रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।

अपृथग्यत्ननिर्वर्त्यः सोऽलंकारो ध्वनौ मतः ॥" ध्वन्यालोकः २।१६ ॥

तथाहि रसाक्षिप्ता अपृथग्यत्ननिर्वर्त्याश्चालंकाराः सार्थकतां भजन्ते काव्यस्यो-त्कर्षं सम्पादयन्ति च। प्रतिभावतः कविचेतसः रससमाधौ यो यत्नोऽपेक्ष्यते तेनैव यत्नेन योऽलंकारोऽभिव्यक्तिं समासादयति स एवालंकारो रसमार्गे सार्थकः। तथाच लक्षितं लोचनकृता—'रससमवधानेन विभावादिघटना-मेव कुर्वंस्तन्नान्तरीयकतया यमासादयति स एवात्रालंकारो रसमार्गे नान्यः' (पृ. २३१-३२)। अतः काव्यालंकारयोः तादात्म्यजातीयः कश्चनान्तर एव सम्बन्धो ध्वनिकृतोऽभिमतो न तु वाह्यिकः कश्चित्।

ध्वनिवादं निराकुर्वतो व्यक्तिविवेककर्तुर्महिमभट्टस्यापि अत्रार्थे महती सम्मतिरस्ति। तथाचोक्तं तेन—"किञ्च सौन्दर्यातिरेकनिष्पत्तयेऽर्थस्य काव्य-क्रियारम्भः कवेः न तु अलंकारनिष्पत्तये, तेषां नान्तरीयकतयैव तत्सिद्धेः, भङ्गिभणितिभेदानामेवालंकारत्वोपगमात्।···

न चालंकारनिष्पत्त्यै रसबन्धोद्यतः कविः।

यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः ॥ व्यक्तिवि. २।७५ ॥

यतः— रसस्याङ्गं विभावाद्याः साक्षान् निष्पादकत्वतः।

तद्विचित्र्योक्तिवपुषोऽलंकारास्तु तदाश्रयाः" ॥ व्यक्तिवि. २।७६ ॥

उक्तञ्चापि कुन्तकेन वक्रोक्तिजीवितकृता—'सालंकारस्य अलंकरणसहितस्य सकलस्य निरस्तावयवस्य सतः समुदायस्य काव्यता कविकर्मत्वम्। तेनालं-कृतस्य काव्यत्वमिति स्थितिः न पुनः काव्यस्यालंकारयोग' इति। [१।६ कारिकाया वृत्त्यंशः]।

मुनेर्भरतस्य मते बीजस्थानीयस्तावद्रसः। यथोक्तं तेन—

"यथा बीजाद् भवेद् वृक्षो वृक्षात् पुष्पं फलं यथा।

तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः ॥ नाट्यशास्त्रम् ॥

अस्यैव रसबीजस्य वृक्षस्थानीयं तावत् काव्यम्। बीजं यथा आत्मनो विकाशवेगवशात् क्रमेण शाखापुष्पफलसमन्विताय वृक्षाय परिणमति तथैव कविचेतसि जायमानो रसः स्वस्यैवाभिव्यक्तेर्दुर्वारवेगवशातश्छन्दोऽलंकारादिसमन्वितं काव्यरूपं विधत्ते।

आदिकवेर्वाल्मीकेरादिकाव्यप्रवृत्तिरेवात्र प्रमाणम्। सहचरीहननोद्भूतेन वैधुर्य्येण क्रौञ्चस्य शोकः वाल्मीकेः समुचितशब्दच्छन्दोवृत्तादिनियण्त्रितश्लोकरूपतां प्राप्तः। अलंकारस्य एतादृशी रसाभिन्नता क्रोचेमहोदयेनापि सुष्ठु लक्षिता। यथोक्तं तेन—

"One can ask one-self how an ornament can be joined to expression. Externally ? In that case it must always remain separate. Internally ? In that case, either it does not assist expression and mars it ; or does form part of it and is not ornament, but a constitute element of expression indistinguishable from the whole."—Æsthetic. ch. IX. P. 113.

ओयालटारपेटारमहोदयस्य मतेऽपि ग्रहणयोग्योऽलंकारः प्राधान्येन काव्यस्याङ्गभूतः प्रयोजनभूतो वा। यथोक्त तेन—

"Permishible ornment being for the most part structural or necessary."—Appreciations ; style.

अत्रोदाहरणं दिङ्मात्रम्—

"कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः।
मुहुः कण्ठे लग्नस्तरलयति वाष्पः स्तनतटीं
प्रियो मन्युर्जातस्तव निरनुरोधे नतु वयम्॥"

अत्र कश्चित् शठो नायकः काञ्चित् खण्डितां नायिकां प्रसादयितुमुद्यतस्तस्याः क्रोधं वर्णयति। नायिकायाः क्रोधः तस्मादपि (नायकादपि) प्रियतरो जातः। स च क्रोधः अपरः प्रिय इव वर्णितः। अत्र चरमे चरणे श्लेषरूपकव्यतिरेकालंकारा मौलमीर्ष्याविप्रलम्भरसं पोषयन्ति। तथाच लक्षितं लोचने—'करकिशलयन्यस्तवदना श्वासतान्ताधरा प्रवर्त्तमानबाष्पभरनिरुद्धकण्ठी अविच्छिन्नरुदितचञ्चत्कुचतटा रोषमपरित्यजन्ती चाटूक्तया यावत् प्रसाद्यते तावदीर्षाविप्र-

लम्भगतानुभावचर्वणावहितचेतस एव वक्तुः श्लेषरूपकव्यतिरेकाद्या अयत्ननिष्पन्नाश्चर्वयितुरपि न रसचर्वणाविघ्नमादधतीति।'

—लोचनम् (चौखाम्बाविद्याभवनम्) पृ. २३२-३३।

उदाहरणान्तरं यथा—

"निर्वाणभूयिष्ठमथास्य वीर्यं सन्धुक्षयन्तीव वपुर्गुणेन।

अनुप्रयाता वनदेवताभिरदृश्यत स्थावरराजकन्या॥" कुमार. ३।५२

तत्र प्रयुक्तोत्प्रेक्षा प्रकृतशृङ्गाररसस्यानुगुणैव। अलंकाराणां सार्थकताविधौ ध्वनिकारोपज्ञा इयं मौलनीतिः यथार्था प्राच्यपाश्चात्त्यकाव्यसमीक्षकाणां सम्मता च।

एवं मौलनीतिं समुद्घोष्यापि पुनर्दिग्दर्शनन्यायेन एका समीक्षा विहिता ध्वनिकृता। यथोक्तं तेन—

"दिङ्मात्रं तूच्यते येन व्युत्पन्नानां सचेतसाम्।

बुद्धिरासादितालोका सर्वत्रैव भविष्यति॥" ध्वन्या. २।१३॥

तथाहि रससमाहितायाः कविकल्पनायाः प्रथमे क्षणे प्रादुर्भवन्तोऽलंकारा नूनमेव यथार्थाः। परन्तु अव्यवहितक्षणान्तरेऽपि बुद्धिप्राधान्येन केचन अलंकारा जायन्ते तेष्वपि रसाक्षिप्तता वर्तत एव। प्रसङ्गेऽस्मिन् कृष्णचैतन्यस्य समीक्षांशः समुद्ध्रियते—

"Some images seem to emerge from the unconscious, along with the first emotional experience. But there are others discovered by the probing intellect, touchgd by the emotion, and the quality of the poem as basically the product of inspiration is not affected adversely in the least by the presence of such images if aesthetic sensibility has adjudged these suggestions of the poetically stirred intellect and accepted them as truly reflecting the emotional experience."

—Sanskrit Poetics. P. 91

दिग्दर्शनन्यायेन ध्वनिकृता विहितेयमलंकारप्रयोगसमीक्षा तेषामेव रससम्भिन्नबुद्धिप्रभवानामलंकाराणां साफल्यवैफल्यविधाविति प्रतिभाति। अथवा काव्यसृष्टिमार्गे प्रथमप्रवृत्तानाम् असमासादितप्रतिभापाकानां कवीनां कृते

इति प्रतिभाति। अथवा प्रतिभारहितानामनुकरणप्रवृत्तानां तात्कालिककवीनामवधानविधानाय विहितेयमलंकारप्रयोगसमीक्षा ध्वनिकृता। यथा लक्षितं राघवन्महोदयेन—'To guide such poets, not gifted with Śakti enough to possess an innate sense of 'aucitya', Ānandavardhana lays down his rules for the employment of Alamkāra.'

—Some Concepts of Alamkāra Śāstra, P. 68.

सा च समीक्षा सारतः समुपस्थाप्यते। अलंकारास्तावद् द्विविधाः शब्दगता अर्थगताश्चेति। तत्र शब्दगतानां केषाञ्चनालंकाराणां प्रयोगविधौ कविभिः सावधानैर्भवितव्यमिति ध्वनिकारस्याशयः। तद्यथा यमकसभङ्गशब्दश्लेषमुरजबन्धनादीनां पौनःपुन्येन प्रयोगविधौ कवेर्विभावादिसंग्रहाद्यतिरिक्तो यत्नो नियमतः समापतत्येव पाठकानां चित्तमपि तथाविधवहिरङ्गशय्यायां विभ्रान्तमन्तर्गतं रसं समुपलब्धुं न प्रभवति। अतस्तादृशा अलंकारा कविना वर्जनीयाः। यथोक्तम्—

'शृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धवान्।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः॥ ध्वन्या. २।१४॥
ध्वन्यात्मभूते शृङ्गारे यमकादिनिबन्धनम्।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः॥" ध्वन्या. २।१५॥

कारिकायां प्रमादित्वमित्यस्य तात्पर्यं वृत्तौ एवं लक्षितम्—'प्रमादित्वमित्यनेन एतद् दर्श्यते काकतालीयेन कदाचित् कस्यचिदेकस्य यमकादेर्निष्पत्तावपि भूम्नालंकारान्तरवत् रसाङ्गत्वेन निबन्धो न कर्तव्यः' इति॥ २।१५ कारिकावृत्त्यशः॥

ततो मृगेन्द्रस्य मृगेन्द्रगामी बधाय बध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः॥ रघु. २।३०

अत्र प्रथमे चरणे स्वाभाविकतया समापतितं मृगेन्द्रेति यमक न रसविघातकम्। परन्तु—

वभौ मरुत्वान् विकृतः समुद्रो वभौ मरुत्वान्विकृतः समुद्रः।
वभौ मरुत्वान् विकृतः समुद्रो वभौ मरुत्वान्विकृतः समुद्रः॥

भट्टि. १०।१९

एतादृशं यमकं न जातु स्वाभाविकतया समापतति। एतादृशयमकनिर्माणे कवेः पृथग्यत्नो नियमेन प्रजायत एव। किञ्च एकरूपोऽनुप्रास एव वर्जनीयः न तु वैचित्र्ययुक्तः। यथा लक्षितं लोचनकृता—'एकरूपं त्वनुबन्धनं त्यक्त्वा विचित्रोऽनुप्रासो निबद्धमानो न दोषायेत्येकरूपग्रहणम्' [लोचनम्, पृ. २३०]।

इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण।

एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः॥ रघु. ५।२३

अत्र प्रयुक्ता अनुप्रासादयः सुप्रयुक्ताः। यद्वा—

दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला।

आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा॥ रघु. १३।१५॥

अत्र वनराजेः वर्णनायां द्वितीयचरणस्य आध्वनिचतुष्टयं तथा समुद्रस्य वर्णनायां तृतीयचरणे आध्वनिपञ्चकञ्च वर्णनाया आनुगुण्यमेव विदधतः।

वक्रोक्तिजीवितकारस्य कुन्तकस्याप्यत्र दृष्टिसाम्यं समासाद्यते। तथा-चोक्तं तेन—

नातिनिर्बन्धविहिता नाप्यपेशलभूषिता।

पूर्ववृत्तपरित्यागनूतनावर्तनोज्ज्वला॥ २।४॥

व्याख्यातञ्चैतदेवं वृत्तौ—"निर्बन्धशब्दोऽत्र व्यासनितायां वर्तते। तेन अति-निर्बन्धेन पुनःपुनरावर्तनव्यसनितया न विहिता, अप्रयत्नविरचितेत्यर्थः। व्यस-नितया प्रयत्नविरचने हि प्रस्तुतौचित्यपरिहाणेः वाच्यवाचकयोः परस्परस्पर्धित्व-लक्षणसाहित्यविरहः पर्यवस्यति।······पूर्वमावृत्तानां पुनःपुनर्विरचितानां परित्यागेन प्रहाणेन नूतनानामभिनवानां वर्णानामावर्तनेन पुनःपुनः परिग्रहेण च तदेवमुभाभ्यां प्रकाराभ्यामुज्ज्वला भ्राजिष्णुः"। (तत्र वृत्तिः)।

यमकादीनां प्रयत्नसाध्यानां शब्दालंकाराणां ग्रहणवर्जनविधौ पण्डित-राजस्य जगन्नाथस्यापि दृष्टिसाम्यं परिदृश्यते। तद् यथा—"···एव त्वप्रत्ययं यङन्तानि यङ्लुगन्तानि अन्यानि च शाब्दिकप्रियाण्यपि मधुररसे न प्रयुञ्जीत। एवं व्यङ्ग्यचर्वणातिरिक्तयोजनाविशेषापेक्षानापाततोऽधिकचमत्कारिणोऽनुप्रास-प्रबन्धान् यमकादींश्च सम्भवतोऽपि कविर्न निबध्नीयात्। यतो हि ते रस-चर्वणायामन्तर्भवन्तः सहृदयहृदयं स्वाभिमुखं विदधाना रसपराङ्मुखं विद-धीरन्···ये तु पुनरक्लिष्टतया अनुन्नतस्कन्धतया च न पृथग्भावनामपेक्षन्ते, किन्तु रसचर्वणायामेव ससुखं गोचरीकर्तुं शक्याः, न तेषामनुप्रासादीनां त्यागो युक्तः"

(रसग. पृ. २८३-८४)। अङ्गिनि शृङ्गारे एव एकरूपानुबन्धवाननुप्रासो वर्जनीयः। अङ्गभूते तु शृङ्गारे कवेः कामचारस्य अवकाशो विद्यते। तथा चोक्तं वृत्तौ—"अङ्गिनि इत्यनेन अङ्गभूतस्य शृङ्गारस्य एकरूपानुबन्ध्यनुप्रास-निबन्धने कामचारमाह।"—ध्वन्या. २।१४ वृत्तिः ।। सामान्येन प्रयुज्यमानोऽयं नियम एतदेव बोधयति सरसयमकादिप्रधाने चित्रकाव्यादौ यमकादीनां प्रयोगो न विरुध्यते। यतस्तत्र रसः अङ्गभूतः। एतदेवाभिप्रेत्य वृत्तावुक्तम्—"यत्तु रसवन्ति कानिचित् यमकादीनि दृश्यन्ते तत्र रसादीनामङ्गता, यमकादीनान्तु अङ्गितैव" (२।१६ वृत्तिः)। दृश्यते च रघुवंशस्य नवमे सर्गे तथा शिशुपालवधस्य चतुर्थे सर्गे यमकादीनां प्रयोगः। पूर्वत्र वसन्तस्य शोभा दशरथस्य मृगया च वर्णनीया परत्र च रैवतकपर्वतो वर्णनीयः। रसाभासादौ पुनः यमकादीनामङ्गत्वं न विरुध्यते इति ध्वनिकारस्य मतम्। यथोक्तम्—

"रसाभासाङ्गभावस्तु यमकादेर्न वार्यते।
ध्वन्यात्मभूते शृङ्गारे त्वङ्गता नोपपद्यते ।।"

ध्वन्या. (संग्रहश्लोकः) पृ. २३५।

तत्र कारणमेवं प्रतिभाति रसाभासादिकं तावदनौचित्यप्रवर्तितम्। एकप्रकाराणां यमकादीनां प्रयत्नसाध्यानां शब्दालंकाराणां प्रयोगोऽपि अलंकारगतमौचित्यमतिक्रामति, यतः तादृशानामलंकाराणां प्रयोगविधौ कविचित्तं रससृष्टिरसपरिवेशनादिरूपात् लक्ष्याद् भवति विच्युतम्। बुद्धेर्दीप्त्या चेतसो रससमाहितता स्तिमिता। एवमत्र अलंकार्यमलंकारश्चेत्युभावेव अनौचित्यदोषदुष्टाविति तादृशे रसाभासप्रधाने काव्ये यमकादीनामन्तरङ्गता अनुमता।

यमकादीनामलंकाराणां प्रयोगे सावधानता अवलम्बनीया औचित्यानुसारतः ते प्रयोज्या इति तावद् ध्वनिकारात् प्राचीनेन काव्यालंकारकृता रुद्रटेनापि समभिव्यञ्जितम्। यथोक्तम्—

"इति यमकशेषं सम्यगालोचयद्भिः।
सुकविभिऽभियुक्तैर्वस्तु चौचित्यविद्भिः ।।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानम्।
तदनु विरचनीयं सर्गबन्धेषु भूम्ना ।।" काव्यालं. ३।५९ ।।

टीकाकारेण नमिसाधुना रुद्रटस्याशयं परिष्कुर्वतोक्तम्—"तथाच वस्तु विषयभागमालोचयद्भिः। यथा कस्मिन् रसे कर्तव्यं क्व वा न कर्तव्यम्।

यमकश्लेषचित्राणि हि सरसे काव्ये क्रियमाणानि रसखण्डनं कुर्युः। विशेषतस्तु शृङ्गारकरुणयोः। कवेः किलैतानि शक्तिमात्रं पोषयन्ति, न तु रसवत्ताम्। यदुक्तम्—

यमकानुलोमतदितरचक्रादिभिदो हि रसविरोधिन्यः।
अभिधानमात्रमेतद् गड्डुरिकादिप्रवाहो वा॥

प्रयोगस्तु तेषां खण्डकाव्येषु देवतास्तुतिषु रणवर्णनेषु च" (निरुक्तकारिका-टीका)। प्राचीनेनाचार्येण दण्डिना यद्यपि यमकालंकारस्य बाहुल्येन विश्लेषणं विहितं तथापि तस्य काव्योपयोगिताविषये स नासीदकुण्ठचित्तः। तथाचोक्तम्—"आवृत्तिमेव संघातगोचरां यमकं विदुः।

तत्तु नैकान्तमधुरमतः पश्चाद् विधास्यते॥" काव्यादर्शः १।६१॥

नव्येनालंकारिकेण मम्मटेनापि यमके समादरो न विहितः। तद्यथा—"तदेतत् काव्यान्तर्गडुभूतमिति नास्य भेदलक्षणं कृतम्।" उपमारूपकादिषु अर्थालंकारेषु यत्नान्तरस्य परिग्रहो नापततीति तादृशा अलंकारा रसस्य परिपोषाय एव जायन्ते इति ध्वन्यालोकवृत्तौ युक्तिप्रदर्शनपूर्वकमेवमुक्तम्—"रसा वाच्यविशेषैरेवाक्षेप्तव्याः। तत्प्रकाशकैश्च शब्दैः तत्प्रकाशिनो वाच्यविशेषा एव रूपकादयोऽलंकाराः" (पृ. २३४)। तस्मादर्थालंकारणां न वहिरङ्गत्वं यमकादीनामिव। ते चालंकाराः प्रतिभावतः कवेः रससमाहितस्य स्वत एव समुद्यन्ति। तथाचोक्तं वृत्तौ—"अलंकारान्तराणि हि निरूप्यमाणदुर्घटनान्यपि रससमाहितचेतसः प्रतिभावतः कवेरहंपूर्विकया परापतन्ति।"

—ध्वन्या. पृ. २३३-३४।

पाश्चात्यसाहित्यसमीक्षकेण जे. एस. ब्राउन—(J. S. Brown : World of Imagery) महोदयेनाप्युक्तम्—"The more emotions grow upon a man, the more his speech; if he makes any effort to express his emotion, abounds in figures—exclamation, interrogation, anaceluthon, apostrophe, hyperbole (yes certainly hyperbole), simile, metaphor. His language is what we sometimes euphemistically describe as 'Picturesque', world of imagency," (Quoted by K.A. Subrahmanya Iyer in his "Studies in the imagery of the Rāmāyaṇa" JOR, Madras. vol. III, pt. 4).

प्रयुज्यमानानामर्थालंकाराणां सार्थकतासार्थकताविधौ ध्वनिकारस्य समीक्षा एवं प्रचलति। काव्यात्मभूतस्य रसस्य अङ्गभावेनैवालंकारः प्रयोक्तव्यो न कदाचिदङ्गिभावेन। तथाच रस एव सहृदयचर्वणायाः केन्द्रविन्दुः स्यात् अलंकारस्तु तामेव रसचर्वणां परिपोषयेत्। किञ्च रसानुगुण्यानुसारतः अलंकारस्य ग्रहणं तथा परिवर्जनञ्च भवेत्। अपि च प्रयुक्तस्यालंकारस्य अतिशयितः परिपोषो न विधेयः। यतस्तथात्वे मुख्यभूता रसचर्वणा एव भवेद् व्याहता। अन्यच्च प्रयुक्तस्यालंकारस्य परिपोषो जायते चेत्तर्हि तस्यापि अङ्गभावेनावस्थापनं सम्पादनीयम्। सर्वमेतद् यथोक्तं ध्वनिकृता—

"विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन।
काले च ग्रहणत्यागौ नतिनिर्वहणैषिता ॥ध्वन्या. २।१८॥
निर्व्यूढावपि चाङ्गत्वे यत्नेन प्रत्यवेक्षणम्।
रूपकादेरलंकारवर्गस्याङ्गत्वसाधनम् ॥" ध्वन्या. २।१९॥

अत्रालंकारस्याङ्गत्वेनावस्थानं यथोदाहृतम्—

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।
करौ व्याधून्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान् मधुकर हतास्त्वं खलु कृती ॥" शाकु. १।२१॥

अभिज्ञानशाकुन्तलनाटकस्य प्रथमेऽङ्के भ्रमरबाधां निवारयन्तीं शकुन्तलां समालोकयतः साभिलाषस्य दुष्यन्तस्येयमुक्तिः। अत्र विद्यमानो भ्रमरस्वभाववर्णनरूपः स्वभावोक्तिरलंकारो मूलीभूतस्य सम्भोगशृङ्गाररसस्योपकारकतया अङ्गभावमेव गतः। अत उक्तं वृत्तौ—'अत्र हि भ्रमरस्वभावोक्तिरलंकारो रसानुगुण' इति। आशयश्च लोचने एवं परिष्कृतः—"हे मधुकर! वयमेवंविधाभिलाषचाटुप्रवणा अपि तत्त्वान्वेषणात् वस्तुवृत्ते अन्विष्यमाणे हता आयासमात्रपात्रीभूता जाताः। त्वं खलु इति निपातेनायत्नसिद्धं तवैव चरितार्थत्वमिति शकुन्तलां प्रत्यभिलाषिणो दुष्यन्तस्येयमुक्तिः। तथाहि—कथमेतदीयकटाक्षगोचरा भूयास्म, कथमेषा अस्मदभिप्रायव्यञ्जकं रहोवचनमाकर्ण्यात्, कथं नु हठादनिच्छन्त्या अपि परिचुम्बनं विधेयास्मेति यदस्माकं मनोराज्यपदवीमधिशेते तत्तवायत्नसिद्धम्। भ्रमरो नीलोत्पलधिया तदाशङ्काकरीं दृष्टिं पुनःपुनः स्पृशति। श्रवणावकाशपर्यन्तत्वाच्च नेत्रयोरुत्पलशङ्कानपगमात् तत्रैव

दन्ध्वन्यमान आस्ते। सहजसौकुमार्यत्रासकातरायाश्च रतिनिधानभूतं विकसितारविन्दकुवलयामोदमधुरमधरं पिबतीति भ्रमरस्वभावोक्तिरलंकारः अङ्गतामेव प्रकृतरसस्योपगतः।” [ध्वन्यालोकः पृ. २३७-८]

वस्तुतस्तु अत्र भ्रमरस्य कृतित्वं प्रति प्रथमचरणत्रयगतवाक्यार्था हेतव इति वाक्यार्थहेतुकं काव्यलिङ्गम्, रहस्याख्यायीवेति क्रियोत्प्रेक्षा ; उक्तविधकार्यत्रयेण भ्रमरे गुप्तप्रेमिकव्यवहारसमारोपात् समासोक्तिः ; उपमानभूतस्य भ्रमरस्य कृतित्वरूपाधिक्यवर्णनात् व्यतिरेकश्चेत्येतेषां परस्परनिरपेक्षतया संसृष्टिरिति नवीनाः। सा चापि संसृष्टिः प्रकृतरसस्योपकरोतीति अङ्गत्वमेव गता। अत उक्तं लोचने—‘अन्ये तु भ्रमरस्वभावे उक्तिर्यस्येति भ्रमरस्वभावोक्तिरत्र रूपकव्यतिरेक इत्याहुः’। [ध्वन्या. पृ. २३८] परन्तु यदि सः अलंकारः अङ्गित्वेन विवक्ष्यते तर्हि तस्य सार्थक्यं परिहीयते। यथोदाहृतम्—

चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूजनस्य।
आलिङ्गनोद्दामविलासवन्ध्यं रतोत्सवं चुम्बनमात्रशेषम्॥

अत्र पर्यायोक्तमलंकारः यतोऽत्र वाच्यं कार्य्यं तथा गम्यं कारणञ्चेति उभयमेव प्राकरणिकम्। तथाच लक्षितं रसगङ्गाधरे—“चक्राभिघातेति प्राचीनपद्ये राहुशिरश्छेदकारीति व्यङ्ग्यं राहुवधूजनसम्बन्धि चुम्बनमात्रावशिष्टरतोत्सवनिर्मातृत्वेन रूपेण प्रकारान्तरेणाभिधीयते इत्यस्यापि विवेचने क्रियमाणे राहुशिरश्छेदकर्तृत्वरूपो धर्मः स्वसामानाधिकरणेन तादृशरूपान्तरेण साक्षादुपात्तेन गम्यत इत्येव पर्यवस्यति” (रसग. आ. २, भा. २ ; पृः ३४८-४६)।
अत्र वासुदेवप्रतापस्य विवक्षितत्वात् रसादितात्पर्यस्य विद्यमानत्वेऽपि पर्यायोक्त्यलंकारस्य प्राधान्यं प्रतिभाति। तथाच लक्षितं लोचने—‘वासुदेवप्रतापो ह्यत्र विवक्षितः। स चात्र चारुत्वहेतुतया न चकास्ति, अपि तु पर्यायोक्तमेव’ (पृः २३६)।

मूलभूतस्य रसस्यानुपकारकत्वेऽलंकाराणां नास्त्युपयोगः नास्ति वा सार्थकता। प्रसङ्गेऽस्मिन् रायमण्डमहोदयेनाप्युक्तम्—‘The one truth underlying all the rules laid down for the employment of figures is that nothing is gained by any use of those which do not add to the effect of the thought to which

any give expression" (Poetry as a Representative Art).
कथितश्चापि ध्वनिकृता—

"रसभावादितात्पर्यमाश्रित्य विनिवेशनम् ।
अलंकृतीनां सर्वासामलंकारत्वसाधनम् ॥" २।२६॥

एवं रसपरत्वेनाङ्गतया च विवक्षितोऽयमलंकारः सर्वथा सार्थकतामेव धत्ते । जैनालंकारिकेण हेमचन्द्रेण स्वकीये काव्यानुशासनग्रन्थेऽस्य व्यतिरेकदृष्टान्तः प्रदर्शितः ।

'स्रस्तः स्रग्दामशोभां त्यजति विरचितामाकुलः केशपाशः
क्षीवाया नूपुरौ च द्विगुणतरमिमौ क्रन्दतः पादलग्नौ ।
व्यस्तः कम्पानुबन्धादनवरतमुरो हन्ति हारोऽयमस्याः
क्रीडन्त्याः पीडयेव स्तनभरविनमन्मध्यभङ्गानपेक्षम्' ॥

रत्नावलीनाटिकायाः प्रथमेऽङ्के नायक उदयनो नृत्यन्तीं कामपि परिचारिकां वर्णयति । 'अत्र पीडयेवेत्युत्प्रेक्षालंकारोऽङ्गी तदनुग्राहकश्चार्थश्लेषः करुणोचितान् विभावानुभावान् सम्पादयन् बाधकत्वेन भातीति न प्रकृतरसोपकारी' ।

अङ्गत्वेन विवक्षितस्यापि अलंकारस्य काले ग्रहणं यथा—

"उद्दामोत्कालिकां विपाण्डुररुचिं प्रारब्धजृम्भां क्षणा-
दायासं श्वसनोद्गमैरविरलैरातन्वतीमात्मनः ।
अद्योद्यानलतामिमां समदनां नारीमिवान्यां ध्रुवं
पश्यन् कोपविपाटलद्युति मुखं देव्याः करिष्याम्यहम् ॥"

वासवदत्तापरिगृहीता माधवीलता सम्प्रति प्रफुल्लेति तद्दर्शनाद् द्वेषवशेन विपाटलद्युति मुखमहं देव्याः करिष्यामीति वत्सराजोक्तिरियं रत्नावलीनाटिकाया द्वितीयेऽङ्के । अत्र श्लेषसंकीर्णोपमालंकारस्य ग्रहणावकाशो भाविन ईर्ष्याविप्रलम्भरसस्य चर्वणाभिमुख्यं सम्पादयतीति सार्थकोऽयमलंकारप्रयोगः । तथाचोक्तं लोचने—'अत्रोपमाश्लेष ईर्ष्याविप्रलम्भस्य भाविनो मार्गपरिशोधकत्वेन स्थितश्चर्वणाभिमुख्यं कुर्वन् अवसरे रसस्य प्रमुखीभावदशायां पुरःसरायमाणो गृहीतः' (पृ: २४०) ।

नियमस्यास्य वैपरीत्येन असार्थकप्रयोगस्योदाहरणं यथोपन्यस्तं काव्यानुशासने—

"वाताहारतया जगद्विषधरैराश्वास्य निःशेषितं
ते ग्रस्ताः पुनरभ्रतोयकणिकातीव्रव्रतैर्बर्हिभिः ।

तेऽपि क्रूरचमूरुचर्मवसनैर्नीताः क्षयं लुब्धकै-
दम्भस्य स्फुरितं विदन्नपि जनो जाल्मो गुणानीहते ॥"

भल्लटकविकृते भल्लटशतके पद्यमिदं दृश्यते। अलंकारप्रयोगस्यात्र वैकल्यमधिकृत्य हेमचन्द्रेणैवमुक्तम्—"अत्र वाताहारत्वं पश्चाद् वाच्यमपि आदावुक्तमित्यतिशयोक्तिरनवसरे गृहीता। तथाहि प्रथमत एव प्रथमपादे हेतूत्प्रेक्षया यदतिशयोक्तेरुपादानं न तत् प्रकृतस्य दम्भप्रकर्षप्रभावतिरस्कृतगुणगणानुशोचनमयस्य निर्वेदस्याङ्गतामेति। न हि वाताहारत्वादधिको दम्भस्तोयकणव्रतं नापि ततोऽधिकं दम्भनत्वं मृगाजिनवसनमिति" (काव्यानुशा. पृ. २३)।

आदौ गृहीतोऽप्यलंकारः पश्चाद्रसानुकूलालंकारान्तरानुरोधेन रसानुरोधेन वा परित्यक्तः सार्थकतामेव भजते। यथोदाहृतं ध्वनिकृता—

"रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणै-
स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्तास्तथा मामपि।
कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः
सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः ॥"

सीताविरहितस्य रामचन्द्रस्य नितरां पर्याकुलितचेतसः अशोकवृक्षमुद्दिश्येयमुक्तिः। अत्र हि प्रथमपादत्रये प्रवृत्तोऽपि श्लेषश्चतुर्थचरणे रसोपयोगिव्यतिरेकालंकारविवक्षया त्यज्यमानः प्रकृतस्य विप्रलम्भशृङ्गाररसस्योपकारं करोति। अत्र च सशोक इत्यनेन व्यतिरेको विवक्षितः। तस्य चोपयोगं प्रतिपादयता लोचनकृतोक्तम्—"सशोकशब्देन व्यतिरेकमानयता शोकसहभूतानां निर्वेदचिन्तादीनां व्यभिचारिणां विप्रलम्भपरिपोषकाणामवकाशो दत्तः" (पृ २४२)।

नियमस्यास्य वैपरीत्येन प्रयुक्तस्यालंकारस्य वैकल्यं यथोदाहृतं काव्यानुशासने—

"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग् वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ॥"

काव्यानुशा. पृ. २४॥

राजशेखरकृते बालरामायणे प्रथमेऽङ्के जनकं प्रति जनकपुरोहितस्य शतानन्दस्योक्तिरियम्। एतादृशस्य प्रयोगस्य असामर्थ्यमधिकृत्य एवमुक्तं हेमचन्द्रेण—

"अत्र न रावण इत्यस्मादेव त्यागो युक्तः। तथाहि रावण इत्येतज्जगदाक्रन्द-कारित्वाद्यर्थान्तरं प्रतिपादयञ्जनकस्य धर्मवीरं प्रत्यनुभावतां प्रतिपाद्यते। ऐश्वर्यं पाण्डित्यं परमेशभक्तिर्देशविशेषोऽभिजन इत्येतत् सर्वं लोकमपबाधमानस्या धर्मपरस्य नार्थक्रियाकारकमिति तावतोऽर्थस्य तिरस्कारकत्वेनैव रावणचेष्टितं निर्वाहणीयम्। यत्त्वन्यदुपात्तं क्व नु पुनरिति तद् यदि ससन्देहत्वेन योज्यते अथाक्षेपत्वेन अथापि नेदृग्वरो लभ्यते इति अर्थान्तरन्यासत्वेन तथापि प्रकृतस्य धर्मवीरस्य न कथञ्चिन् निर्वाहः (काव्यानुशा. पृ. २४)।

प्रयुक्तोऽलंकारः परिपोषितश्चेत् मौलं रसं विघातयेत्तर्हि सोऽलंकारो न परिपोषयितव्यः। यथोदाहृतं ध्वनिकृता—

"कोपात् कोमललोलबाहुलतिकापाशेन बद्धा दृढं
नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः।
भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितं
धन्यो ह्न्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन्॥

श्लोकेऽस्मिन् नायिकायाः कोमलो बाहुः लतिकया सहोपमितः। अथाद् बाहौ लतिकाया आरोपः कृतः। तेन रूपकमलंकारः। स यदि सम्पूर्णतया प्रयुक्तः स्यात्तर्हि दयितायां व्याधवध्वाः वासनिकेतने पञ्जरस्यारोपणं स्यात्। तच्च समुचितं न स्यात्। यथा लक्षितं लोचने—"बाहुलतिकायाः बन्धनीयपाशत्वेन रूपणं यदि निर्वाहयेत् दयिता व्याधवधूः, वासगृहं कारागारपञ्जरादीति परमनौचित्यं स्यात्" (पृ. २४६-४७)। अतोऽत्रालंकारः सामान्येन प्रयुक्तो न चास्य परिपोषो विहितः।

अननुकूलतया परिपोषितस्यालंकारस्य वैकल्यं यथोदाहृत हेमचन्द्रेण काव्यानुशासने—

"सञ्चितपक्ष्मकपाटं नयनद्वारं स्वरूपताडेन।
उद्घाट्य मे प्रविष्टा देहगृहं सा हृदयचौरी॥"

प्रयोगस्यास्य वैफल्यमधिकृत्य हेमचन्द्रेणोक्तम्—'अत्र नयनद्वारमित्येतावदेव सुन्दरं श‍ृङ्गारानुगुणं नत्वन्यद् रूपणमिति'। ध्वन्यालोकस्य तृतीयोद्योतेऽपि लोचनकृता इदमुदाहृतम्। तत्र चतुर्थचरणन्तु एवम्—'हृदयगृहं मे नृपतनूजा'।

परिपोषितोऽपि अलंकारो यदि अङ्गत्वेन समावेश्यते उपकरोति चाङ्गिनं

रसं तर्हि सोऽलंकारः सार्थकतां भजते। यथोदाहृतं ध्वनिकृता मेघदूतगतं पद्यमेकम्—

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि! सादृश्यमस्ति॥ उत्तरमेघ. ४३

अत्र परिपुष्टतया प्रयुक्त उत्प्रेक्षालंकारः। स चाङ्गभावेनैव निवेशित इति मौलं विप्रलम्भशृङ्गाररसं सातिशयं पुष्णाति। यथोक्तं लोचनकृता—"अत्र ह्युत्प्रेक्षायास्तद्भावाध्यारोपरूपाया अनुप्राणकं सादृश्यं यथोपक्रान्तं तथा निर्वाहितमपि विप्रलम्भरसपोषकमेव जातम्" (पृ. २४८)।

वैफल्यस्योदाहरणं यथा प्रदत्तं हेमचन्द्रेण—

"न्यञ्चत्कुञ्चितमुत्सुकं हसितवत् साकूतमाकेकरं
व्यावृत्तं प्रसरत्प्रसादि मुकुलं सप्रेम कम्प्रं स्थिरम्।
उद्भ्रान्तमपाङ्गवृत्ति विकचं मज्जत्तरङ्गोत्तरं
चक्षुः साश्रु च वर्तते रसवशादेकैकमन्यक्रियम्॥"

'अत्र रावणस्य दृगविंशतौ वैचित्र्येण स्वभावोक्तिर्निर्वाहितापि रसस्याङ्गत्वेन न योजितेति'। इयमेव समासतः ध्वनिकारप्रदर्शिता अलंकारप्रयोगसमीक्षा। अनन्यपरतन्त्रा असामान्या च ध्वनिकारस्य मनीषा यस्यां साहित्यतत्त्वानां निरवद्यं यथायथं च प्रतिफलनं जातम्। तथापि अस्यामलंकारसमीक्षायां किञ्चित्पूर्ववर्तिनः रुद्रटस्य कश्चन प्रभावस्तिष्ठेन्नाम। यथा लक्षितं राघवन्-महोदयेन—"The idea that Rasa and rasaucitya control alamkāra is already seen in Rudraṭa......After dealing with some śabdālamkāras like yamakas which are a siren to poets who are easily tempted, Rudraṭa says, by way of closing the chapter, that these figures must be introduced after bestowing due thought on propriety, Aucitya, with reference to the main theme. Even the anuprāsas have to be now cast away and now taken up and sparsely used to be of much advantage. They must not be thickly overlaid upon the theme through the whole length of it.

एताः प्रयत्नादधिगम्य सम्यक् औचित्यमालोच्य तथार्थसंस्थम् ।
मिश्राः कवीन्द्रैरघनाल्पदीर्घाः कार्य्या मुहुश्चैव गृहीतमुक्ताः ॥

—K. AK 11.32.

This is Aucitya of Alamkāra which Ānandavardhana elaborates in Uddyota II of his work. It is this idea in the last line of Rudraṭa's verse quoted above 'gṛhīta-muktāḥ' that Ānandavardhana has formulated into the rule 'kāle ca grahaṇatyāgau' (11.19) taking up and throwing away according to the circumstances, as regards the use of figures."—

—Some concepts of Alamkāra Śāstra, PP. 230-31

एवं तत्रभवता ध्वन्यालोककृता अलंकाराणां सर्वथा काव्यशरीराभिन्नत्वमेव व्यवस्थापितम् । परन्तु तेऽलंकारा यदि व्यञ्जनया प्रकाश्यन्ते तर्हि तेषामात्मायमानता जायते । वाच्यालंकारेभ्यो व्यङ्ग्यालंकाराणामस्ति अतिशयितं किमपि माधुर्य्यम् । तथाचोक्तं ध्वनिकृता—

शरीरीकरणं येषां वाच्यत्वेन व्यवस्थितम् ।
तेऽलंकाराः परां छायां यान्ति ध्वन्यङ्गतां गताः ॥२।२९॥

व्याख्यातश्चैतत् लोचनकृता—"येषामलंकाराणां वाच्यत्वेन शरीरीकरणं शरीरभूतात् प्रस्तुतादर्थान्तरभूततया अशरीराणां कटकादिस्थानीयानां शरीरतापादनं व्यवस्थितं सुकवीनामयत्नसम्पाद्यतया । यदि वा वाच्यत्वे सति येषां शरीरतापादनमपि न व्यवस्थितं दुर्घटमिति यावत् । तेऽलंकारा ध्वनेर्व्यापारस्य काव्यस्य व्यङ्ग्यतां व्यङ्ग्यरूपतया गताः सन्तः परां दुर्लभां छायां कान्तिमात्मरूपतां यान्ति" (पृ. २९९-३००) ।

अत्रेदं तत्त्वं प्रतिभाति—रससमाधिमनादृत्य अलंकारचिकीर्षामात्रवशवर्त्ती कविः यानलंकारान् निबध्नन्ति ते कटककुन्तलादिवत् सर्वथा बाह्या एव । ये तु रसाक्षिप्ततया रससमाहितकविचेतसः प्रादुर्भवन्ति ते काव्यशरीराभिन्ना एव । परन्तु तादृशा रसाक्षिप्ता अलंकारा यदि समभिव्यज्यन्ते तर्हि तेषां काव्यात्मत्वमपि स्वीकृतम् । तेषां व्यङ्ग्यालंकाराणां वाच्योपस्कारकत्वेऽपि वाच्यालंकारेभ्यो विद्यते गौरवम् । एतदेव संसूचयता लोचनकृतोक्तम्—

"सुकविर्विदग्धपुरन्ध्रीवत् भूषणं यद्यपि श्लिष्टं योजयति तथापि शरीरतापत्तिरेवास्य कष्टसम्पाद्या कुङ्कुमपीतिकाया इव। आत्मतायास्तु का सम्भावनाऽपि। एवम्भूता चेयं व्यङ्ग्यता या अप्रधानभूतापि वाच्यमात्रालंकारेभ्य उत्कर्षमलंकाराणां वितरति। बालक्रीड़ायामपि राजत्वमिवेति" (पृ. ३००)।

अत्रेदमवधेयम्—वस्त्वलंकाररसादिभेदेन ध्वनेस्त्रिविधत्वेऽपि रसध्वनेरेव प्राधान्यम्। तस्यैव च काव्यात्मत्वं ध्वनिकृतामप्यभिमतम्। तथाचोक्तं तेन—'काव्यस्यात्मा स एवार्थः'। व्याख्यातश्चैतल्लोचने—"स एवेति प्रतीयमानमात्रेऽपि प्रक्रान्ते तृतीय एव रसध्वनिरिति मन्तव्यम्, इतिहासबलात् प्रक्रान्तवृत्तिग्रन्थार्थबलाच्च। तेन रस एव वस्तुत आत्मा"। [ध्वन्या. पृ. ६८] एवं रसस्य काव्यात्मत्वेऽपि समभिव्यज्यमानौ वस्त्वलंकारौ सर्वथा रसं प्रति पर्य्यवस्येते इति वाच्यादुत्कृष्टौ तौ भवतः। बालकानां क्रीड़ासु यो राजा भवति तस्य राजभावस्तत्त्वदृष्ट्या न यथार्थः परन्तु तदानीं विद्यते तस्य कापि समुपभोग्यता। एवमेव प्रधानतया ध्वन्यमानानामलंकाराणां रसपर्यवसायितया वाच्यालंकारेभ्यः किमपि प्राधान्यं परिलक्ष्यते। अतः सामान्येन अलंकारध्वनेरपि काव्यात्मत्वमभ्युपगच्छता ध्वन्यालोककृतोक्तम्—'काव्यस्यात्मा ध्वनिरि'ति।

अलंकाराणां साफल्यवैफल्यविधौ ध्वनिकारप्रदर्शितामिमामेव समीक्षाशैलीमवलम्ब्य परवर्तिना क्षेमेन्द्रेण स्वीये औचित्यविचारचर्चाग्रन्थे औचित्यानुसारिणी आलंकारिकी समीक्षा विहिता। तथाचोक्तं तेन—

'काव्यस्यालमलंकारैः किं मिथ्यागणितैर्गुणैः।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ॥' ४

किञ्च उचितस्थानविन्यासादलंकृतिरलंकृतिः। अलंकृतिरुचितस्थानविन्यासादलंकर्तुं क्षमा भवति, अन्यथा त्वलंकृतिव्यपदेशमेव न लभते।

यदाह— कण्ठे मेखलया नितम्बफलके तारेण हारेण वा
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।
शौर्य्येण प्रणते रिपौ करुणया नायान्ति के हास्यता-
मौचित्येन विना रुचिं प्रतनुते नालंकृतिर्नो गुणः ॥ ६

औचित्यानुसार्यलंकारयोजनाचिन्ताया बीजं भरतप्रणीते नाट्यशास्त्रेऽपि प्राप्यते। यथोक्तम्—

"अदेशजो हि वेषस्तु न शोभां जनयिष्यति ।

मेखलोरसि बन्धे च हास्यायैवोपजायते ।।' ना. शा. २३।६९

ध्वनिकृतापि ध्वन्यालोकस्य तृतीयोद्योतेऽलंकाराणामौचित्येन योजनमुपदिष्टम् । यथोक्तम्—"अलंकृतीनां शक्तावप्यानुरूप्येण योजनम् ।

प्रबन्धस्य रसादीनां व्यञ्जकत्वे निबन्धनम् ।। ध्वन्या. ३।१४ ।।

अतोऽलंकाराणां प्रयोगस्य साफल्यवैफल्यसमाकलने ध्वनिकारक्षेमेन्द्रयोः दृष्टिसाम्यमतितरां समासाद्यते । क्षेमेन्द्रप्रदर्शितमुदाहरणं दिङ्मात्रमुदाह्रियते—

"विश्रान्तविग्रहकथो रतिमान् जनस्य

चित्ते वसन् प्रियवसन्तक एव साक्षात् ।

पर्युत्सुको निजमहोत्सवदर्शनाय

वत्सेश्वरः कुसुमचाप इवाभ्युपैति ।।"

अत्र वत्सेश्वरस्य कुसुमचापेन सहोपमा औचित्येन प्रयुक्ततया सुप्रयुक्ता सहृदयहृदयाह्लादिनी च ।

औचित्यवैधुर्येण प्रयुक्तोऽलंकारो न सार्थक्यं भजते । यथोदाहृतम्—

"खगोत्क्षिप्तैरन्त्रैस्तरुशिरसि दोलेव रचिता

शिवा तृप्ताहारा स्वपिति रतिखिन्नेव वनिता ।

तृषार्तो गोमायुः सरुधिरमसिं लेढि बहुशो

बिलान्वेषी सर्पो हृतगजकराग्रं प्रविशति ।।"

अत्र रतिकेलिप्रतिकूलरणाङ्गने वर्तमानायाः पुरुषपिशिततृप्तसुप्तायाः शिवायाः सुरतक्लान्तया वनितया सहोपमा नोचिता । अतोऽत्र प्रयुक्तोपमा सौन्दर्यहीना प्रकृतबीभत्सरसप्रतिकूलतामाचरति च ।

क्षेमेन्द्रग्रन्थात् उद्धृते प्रथमोदाहरणे प्रयुक्तोपमा प्रकृतशृङ्गाररसानुकूलतयैवाङ्गतया प्रयुक्ता द्वितीये तु तादृश्या उपमाया अकाले ग्रहणं विहितमिति ध्वनिकारप्रदर्शिता समीक्षा स्यात् । अलंकारस्यैतादृशसमुचितप्रयोगे वक्रोक्तिजीवितकारस्यापि सम्मतिरस्ति । तथाहि सुकुमारवस्तुवर्णनप्रसङ्गे अधिकतया अलंकारप्रयोगो नेष्यते तेन । यथोक्तम्—'यदेवंविधे भावस्वभावसौकुमार्यवर्णनप्रस्तावे भूयसां न वाच्यालंकाराणामुपमादीनामुपयोगयोग्यता सम्भवति स्वभावसौकुमार्यातिशयम्लानताप्रसङ्गात्' । वक्रोक्तिजीवितम्—पृः १३४

विषयानुरूप्येणैव अलंकारयोजना कुन्तकस्याभिमतासीत् । यथोक्तम्—

यस्मान् महाकवीनां प्रस्तुतौचित्यानुरोधेन कदाचित् स्वाभाविकमेव सौन्दर्य-मेकराज्येन विजृम्भयितुमभिप्रेतं भवति । कदाचित् विविधरचनावैचित्र्ययुक्त-मिति। अत्र पूर्वस्मिन् पक्षे रूपकादेरलंकरणकलापस्य न तादृक् तत्त्वम् । अपरस्मिन् पुनः स एव सुतरां समुज्जृम्भते ।' [व. जो. पृ. १३८] विचित्रमार्गे एवालंकाराणां प्रयोगप्राचुर्य्यमभिमतमासीत् कुन्तकस्य । यथोक्तम्—

अलंकारस्य कवयो यत्रालंकरणान्तरम् ।
असन्तुष्टा निबध्नन्ति हारादेर्मणिबन्धवत् ॥ १।३५

कविप्रयुक्तानामलंकाराणामसाफल्यविधौ अन्यानि कतिचनोदाहरणानि समुद्ध्रियन्ते—

दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव ॥

हिमालयमाहात्म्यवर्णप्रसङ्गे कालिदासस्येयमुक्तिः । अत्रोत्प्रेक्षितार्थस्य अचेतनान्धकारत्रासस्य सम्भूततयैव स्वरूपं प्रकाशितम् । तथाहि प्रकृतस्य अप्रकृतात्मना सम्भावनमुत्प्रेक्षा । तेनोत्प्रेक्षितोऽर्थः कविकल्पितो न तत्त्वतः सिद्धः । अतोऽर्थान्तरन्यासेन तस्य पुनः समर्थनं न युज्यते । अर्थान्तरन्यासालंकारस्य अत्रानौचित्येनाकाले ग्रहणं विहितं कविना ।

दृष्ट्वेव निर्जितकलापभरामधस्ताद्
व्याकीर्णमाल्यकवरां कवरीं तरुण्याः ।
प्रादुद्रवत् सपदि चन्द्रकवान् द्रुमाग्रात्
संहर्षिणा सह गुणाभ्यधिकैर्दुरासम् ॥ शिशु. ५।१६ ॥

अत्र भयहेतुकं प्रकृतं पलायनं कविना कवरीदर्शनहेतुकत्वेनोत्प्रेक्षितम् । तच्च वास्तवदृष्ट्या न यथार्थमिति तस्य पुनरर्थान्तरन्यासेन समर्थनं न युक्तम् । अतोऽत्रार्थान्तरन्यासस्याकाले ग्रहणं कृतम् ।

राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥

रामेण ताड़काया बधोऽत्र वर्ण्यते कविना । मौलो रसस्तावदत्र बीभत्सः । परन्तु प्रयुज्यमानं श्लेषसंकीर्णं रूपकं शृङ्गाररसस्याभिव्यञ्जकम् । बीभत्स-शृङ्गारयोः रसयोः विरोधः सहृदयहृदयवेद्यः अलंकारशास्त्रनिर्दिष्टश्च । यथोक्तम्

दर्पणे—'शृङ्गारे तु बीभत्स इत्याख्याता विरोधिता'। अतोऽत्र रूपकालंकारस्य रसविरोधित्वादनुचितत्वेनैव प्रयोगो विहितः।

अवगाढः सुदुष्पारं शोकसागरमब्रवीत्।
रामशोकमहाभोगः सीताविरहपारगः॥
श्वसितोर्मिमहावर्तो बाष्पफेनजलाविलः।
बाहुविक्षेपमीनौघो विक्रन्दितमहास्वनः॥
प्रकीर्णकेशशैवालः कैकेयीवड़वामुखः।
ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः॥
यस्मिन् बत निमग्नोऽहं कौशल्ये राघवं विना।
दुस्तरो जीवता देवि! ममायं शोकसागरः॥

रामा. अयोध्या. ५९।३२-३६॥

रामायणस्यायोध्याकाण्डे मुमुर्षोर्दशरथस्य अस्यामुक्तौ करुणरसप्रधाने एतादृशानां रूपकालंकाराणामतिशयिततया निर्वाहो न समीचीन इति प्रतिभाति।

किष्किन्ध्याकाण्डे पतितमग्रजदेहमधिकृत्य सुग्रीवेन विहितायां विलापोक्तावपि रूपकस्यानुचितमतिनिर्वहणं परिदृश्यते। यथा—

"सौन्दर्यघातापरगात्रबालः सन्तापहस्ताक्षिशिरोविषाणः।
एनोमयो मामभिहन्ति हस्ती दृप्तो नदीकूलमिव प्रवृद्धः॥"

—रामा. किष्किन्ध्या. २४।१७॥

वेणीसंहारनाटकेऽपि पितुर्मरणवार्ताश्रवणेन शोकाभिभूतस्य अश्वत्थाम्नः उक्तौ रूपकस्य निर्वाहो न युक्ततया भाति। तद्यथा—"त्वरते मे तावत् तातपरिभवानलदह्यमानमिदं चेतः प्रतीकारजलावगाहाय" (३यः अङ्कः)।

यत्र वर्णनीये वस्तुनि अप्रस्तुतस्य कस्यचन वस्तुनो व्यवहारसमारोपोऽभिव्यज्यते तत्र जायते समासोक्तिरलंकारः। अयमलंकारः काव्यसृष्टेर्नितरामुपकारकः। अस्यालंकारस्य महिम्ना चेतनाचेतनयोः सीमा भवति व्यपगतः। अचेतना अल्पचेतना वा पदार्थाः चित्तवन्तः सन्तः कविसृष्टौ विभान्ति। दण्डिणा कथितस्य समाधिगुणस्य सत्तात्र परिलक्ष्यते। समाधिगुणोस्यत्कर्षं प्रतिपादयता दण्डिणोक्तम्—

"तदेतत् कविसर्वस्वं समाधिर्नाम यो गुणः।
कविसार्थः समग्रोऽपि तमेनमनुगच्छति॥" काव्यादर्शः १।१००

समासोक्त्यलंकारस्य सार्थकोदाहरणानि कालिदासादीनां काव्येषु सुलभरूपाणि। मेघदूतकाव्यात् दिङ्मात्रमुदाह्रियते—

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुलभं दर्शितावर्तनाभेः।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः सन्निपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु॥ पूर्वमेघः २८

वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धुः
पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णैः।
सौभाग्यं ते सुभग! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः॥ तत्रैव २९

अत्र निर्विन्ध्यानद्यां विरहिण्या नायिकाया आचरणं समारोपितम्। इयञ्च समासोक्तिः मूलभूतं विप्रलम्भश्रृङ्गाररसमतिशयेन पुष्णाति। विरहिणो नायकस्य यक्षस्य नयनयोः विश्वमेव चेतनाचेतनात्मकं विरहविधुरं प्रतिभाति।

परन्तु अत्रापि अलंकारे तादृशो व्यवहारसमारोपो व्यञ्जनयैव विधातव्यः। व्यञ्जनया प्रतिपाद्यमानस्य व्यवहारसमारोपरूपस्यार्थस्य अर्थैकदेशस्य वा यदि अभिधया प्रतिपादनं भवति तर्हि जायते तस्यालंकारस्य वैकल्यम्। शिशुपालबधस्य नवमसर्गे सूर्यास्तवर्णनप्रसङ्गे परिदृश्यते—

अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम्।
निरकाशयद्रविमपेतवसु वियदालयादपरदिग्गणिका॥ ९।१०

अनुरागयुक्तमपि सुन्दरमपि नायकं द्रविणहीनत्वात् गणिका यथा स्वगृहान् निष्काशयति तथैव रक्तिमं सुन्दरं सूर्यं रश्मिरहितं पश्चिमा दिगस्तं गमयति। अत्र रवौ नायकव्यवहारसमारोपः पश्चिमदिशि च गणिकाव्यवहारसमारोपो व्यञ्जनया क्रियमाणः चारुत्वमावहेत्। तस्य तु वियदालयेति अपरदिग्गणिकेति शब्देन रूपणात् चारुत्वहानिरतितरां जाता। "कथमपि वाच्यवृत्त्यानालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वेनालंकारिकैः स्वीकारात्" इत्युक्तं पण्डितराजेन रसगङ्गाधरे। यथा वा रघुवंशे—

निद्रावशेन भवता ह्यनवेक्ष्यमाणा पर्युत्सुकत्वमबला निशि खण्डितेव।
लक्ष्मीर्विनोदयति येन दिगन्तलम्बी सोऽपि त्वदाननरुचिं विजहाति चन्द्रः॥

रघु. ५।६७

अत्र व्यञ्जनयैव लक्ष्म्यां खण्डितनायिकाव्यवहारः सममबुध्यते तस्य पुनः खण्डिता अबलेवेति उपमया वाच्यायमानत्वं न सौन्दर्यावहम्।

तथा च समासोक्तौ कार्यसाम्येन लिङ्गसाम्येन विशेषणसाम्येन वा अभिव्यञ्जितस्य औपम्यस्य शब्देनोपादानं तस्यालंकारस्य वैकल्यं प्रकाशयति। उक्तश्चात्र प्रसङ्गे व्यक्तिविवेककृता—

उभयार्थपदनिबन्धो लिङ्गविशेषः पदश्च गुणवृत्ति।

उपमानविशेषाश्रयमर्थं गमयति स नहि पुनर्वाच्यः ।। व्यक्तिविवेक २।४३

अप्रस्तुतादर्थात् प्रस्तुतस्यार्थस्य गम्यत्वेऽप्रस्तुतप्रशंसालंकारो जायते। तत्र गम्यमानस्य प्रस्तुतार्थस्य कथमपि अभिधया प्रकाशनं न युक्तरूपम्। उदाहरणमेकं यथा—

आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम्।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यचेतसं प्रभुमिवानासृष्टतत्त्वान्तरम् ।।

राजमण्डलेष्वाहूतेषु तत्र कदाचिदग्रे क्वचिन्न मध्ये कोऽपि क्षुद्रभूस्वामी समागतस्तन्निन्दार्थमियमुक्तिः। अत्राप्रस्तुतानां मशकादीनामभिधानवशादेव क्षुद्रतया अचेतसः प्रभोर्व्यञ्जनतया प्रतीतिर्जायते। तस्य पुनः शब्देनाभिधानं न युज्यते। एवमत्रोपमाया अनवसरे ग्रहणमप्रस्तुतप्रशंसायाः सौन्दर्य्यं विघातयति।

प्रतिवस्तूपमादृष्टान्तादौ औपम्यस्य गम्यत्वमेव सौन्दर्यस्य निष्पादकम्। तस्यौपम्यस्य पुनः कथमपि वाच्यवृत्त्या प्रकाशनं न शोभनम्। प्रसङ्गेऽस्मिन् शिशुपालवधमहाकाव्यस्य द्वितीयसर्गादिकः श्लोकः समुद्धृत्य विचार्य्यते—

तृप्तियोगः परेणापि महिम्ना न महीसयाम्।
पूर्णश्चन्द्रोदयाकाङ्क्षी दृष्टान्तोऽत्र महार्णवः ।। २।३१

अत्र हि प्रतिवस्तुपमालंकारशक्त्यैव महार्णवमहीयसामुपमानोपमेयभावः समभिव्यज्यते। दृष्टान्तशब्देन पुनः महार्णवशब्दस्योपमानत्वकथनं न यथार्थरूपं विभाति।

यथोत्प्रेक्षायां तथैव अतिशयोक्तावपि प्रसिद्धिमतिरिच्य अध्यवसानं न शोभनं जायते। नैषधचरिताद् दिङ्मात्रमुदाह्रियते—

8

तस्मात् किल श्रोत्रसुधां विधाय रम्भाचिररम्भामतुलां नलस्य ।
तत्रानुरक्ता तमनाप्य भेजे तन्नामगन्धान्नलकूबरं सा ।। ३/२६

अत्र रंभाकर्तृकस्य तथाविधस्य नलकूबरभजनस्यासम्बन्धेऽपि तत्सम्बन्धोक्त्या अतिशयोक्तिरलंकारः । इयञ्चातिशयोक्तिः तत्त्वादतीव विच्युतेति सौन्दर्य-सृष्टौ मन्थरगतिका । अतिशयोक्तेः साफल्यमधिकृत्य राघवन्महोदयेनोक्तम्—"As with hyperbole, so with conceits; the departure from truth must not be shocking" (p. 87). उक्तञ्चापि आनन्द-वर्धनेन—"कथं हि अतिशययोगिता स्वविषयौचित्येन क्रियमाणा सती काव्ये नोत्कर्षमावहेत्" (ध्वन्या. उद्योत. ३ पृ. ४६६)। अत्र लोचनम्—"अनौचित्येन तु शोभा लीयत एव ।" अपि च—

श्रृण्वन् सदारस्तदुदारभावं हृष्यन् मुहुर्लोम पुलोमजायाः ।
पुण्येन नालोकत लोकपालः प्रमोदबाष्पावृतनेत्रमालः ।। नै. ३।२८

अत्र नलगुणश्रवणेन शचीदेव्याः रोमाञ्चवर्णनरूपातिशयोक्तिरौचित्यमावहति न वेति सुधीभिर्विभावनीयम् । एवंप्राया बह्वोऽतिशयोक्तयः श्रीहर्षकाव्ये परिप्राप्यन्ते ।

॥ नैषधचरिते समाजचित्रम् ॥

—देवकुमार दासः

कवित्वप्रतिभाप्रभया कालिदासोत्तरं संस्कृतसाहित्याकाशमुद्भासयतां कविमुख्यानामेकतमस्तत्रभवान् श्रीहर्षः। नलदमयन्त्योः प्रेमोपाख्यानमुपजीव्य हर्षकविना विरचितं नैषधचरितनामधेयं शृङ्गाररसात्मकं द्वाविंशतिसर्गनिबद्धं महाकाव्यमनुपमं सहृदयहृदयानि रसोल्लासवारिधौ चिराय निमज्जयद् नितरां देदीप्यते। यद्यपि प्राधान्येन महाभारतकथावस्तु समाश्रित्य कविना स्वस्य लोकोत्तरकल्पनाविभवेन प्रणीतमिदं महाकाव्यं तथापि तत्कालीनसामाजिकस्थितेः कतिचन तथ्यानि काव्यादस्मात् सुखमेव समुन्नेतुं शक्यन्ते। तथाहि लोकाचारादारभ्य खाद्याभ्यासशिक्षाव्यवस्थादीनि सामाजिकार्थनैतिकधर्मीयानुष्ठानानि च बाहुल्येनात्र समुपस्थापितानि दृश्यन्ते।

श्रीहर्षकवेः समकालिकः समाजो मध्ययुगस्थितायाः भारतभूमेरेव प्रतिच्छविः। तदानीन्तने काले वर्णाश्रमव्यवस्था प्रचलितासीत् यस्यां ब्राह्मणाः प्रधानीभूता नितरां सम्मानार्हाश्चासन्। स्वधर्मभ्रष्टानां मद्यपानादिना अधःपतितानां विप्राणां स्वर्गगमने नास्त्यधिकार इत्यासीत् जनानां विश्वासः। तथाचोक्तं नैषधचरिते—

"किमु दिवं पुनरेति यदीदृशः पतित एव निषेव्य हि वारुणीम् ॥" ४.७० ॥

गार्हस्थ्य-वाणप्रस्थ-सन्न्यासादीनामपि आश्रमव्यवस्थानां सामुल्लेखो दृश्यते श्रीहर्षकवितायाम्—

"स गृहे गृहिभिः पूर्णे वने वैखानसैर्घने।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे ॥" १७.१७५ ॥

निषधराज्ये नलस्य शासनगुणेन तस्य प्रजा अपि वर्णाश्रमाचारपथे अचञ्चला एवाभवन्—"वर्णाश्रमाचारपथात् प्रजाभिः स्वाभिः सहैवास्खलते नलाय" (१४.१५)। ब्रह्मचारिणो मौञ्जमेखलां परिदधते स्म, हस्तेन च पलाशदण्डमधारयन् (१७/१८०), अजिनमपि ते व्यवहृतवन्तः (१७/१८६)। सन्न्यासिनां परिव्राजकानाञ्च कौषिकोत्तरीयस्यापि समुल्लेखो दृश्यते—"तापसोऽयं सन्ध्याभ्रकाषायमधत्त सायम्।" २२/१२ ॥ समाजे क्षत्रिया राजकर्मचारि-

रूपेण उच्चैः पदमलंकृतवन्तः। योद्धृरूपेण तेषां प्रसिद्धिरपि अविसंवादितैव। नैषधचरिते लेखकरूपेणापि तेषां नियोगः समुल्लिखितः। तथाहि चतुर्दश-सर्गस्य ६६-तमे श्लोके यमस्य लेखकरूपेण चित्रगुप्तस्योल्लेखः प्राप्यते। समाजे निम्नवर्णीयानां नीचकुलसम्भूतानां च शूद्राणां स्थानमतीव हेयमासीत्। सामाजिकपदमर्य्यादाभिः नितरां हीनानां तेषां वेदादिशास्त्रपाठे श्रवणे च नासीदधिकारः। तथाचोक्तम्—"पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम्।" (४/६२)। चण्डालाः प्राणिवधजनितेषु नृशंसकर्मसु निरता आसन्। शरनिर्माणादिभिः काण्डकाराश्चापि तेषां सहायिनः समाजे समामेव पदवीमलभन्त। तथाहि नैषधचरितस्य नवमसर्गान्तर्गते १५१ संख्यके श्लोके कविना अनङ्गश्चण्डालरूपेण तथा वसन्तः काण्डकाररूपेणोपकल्पितौ। जनानां नितरामवज्ञां समासादयन्तस्ते विगर्हितं जीवनमतिवाहयन्ति स्म।

प्राचीनभारते मानवानां जीविका वंशानुक्रमिका शास्त्रकारादिभिश्च सुनिर्दिष्टासीत्। जातिभेदेन कर्मभेदोऽप्यासीत् पृथक् पृथगेव। श्रीहर्षस्य कालेऽपि नास्त्यस्य व्यभिचारः। नैषधचरितोपवर्णिते समाजे बहुविचित्राणां जीविकानामुल्लेखः प्राप्यते। तन्तुवाय-चित्रकर-वीणावादक-कुम्भकार-स्वर्ण-कार-नर्तक-वणिगुद्यानपालक-यादुकर-रजक-कुसीदजीवि-वैहासिक-स्थपति-मौहूर्तिक-निक्षेपणिकादीनां विचित्रजीविकाश्रयिणां समुल्लेखोऽस्माकं विस्मय-मावहति। उत्तमर्णा अधमर्णाद् भूयोगुणमर्थं प्रायेण अगृह्णन् (७/३३), चौर्यभयाद् वणिजां सविधे अर्थालंकारादीनां न्यासः कृतो जनैः (७।५५)।

श्रीहर्षसमकालिके समाजे विवाहबन्धनं शास्त्रनिर्दिष्टमार्गेणानुष्ठितमभवत्। समाजे असवर्णगोत्रीयाणाम् असवर्णप्रवराणां मध्ये वैवाहिकसम्बन्धो विहितः। समगोत्रप्रवरयोर्मध्ये परिणय आसीन्निषिद्धः। यथोक्तम्—

गोत्रानुकूलत्वभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः।
पुरश्चकार प्रवरं वरं यमायन् सखायं ददृशे तया सः॥

—नै. च. १४/६२॥

निर्द्धारिते लग्ने वेदविहितमार्गमनुसृत्य ललनाचारानुयायिना च पथा पाणि-ग्रहणमनुष्ठानं विहितमासीत्। तथोक्तम्—

सृजन्तु पाणिग्रहमङ्गलोचिता
मृगीदृशः! स्त्रीसमयस्पृशः क्रियाः।

श्रुतिस्मृतीनां तु वयं विदध्महे
विधीनिति स्माह च निर्ययौ च सः ॥ नै. च. १५/७ ॥

नलदमयन्त्योः विवाहवर्णनायां लोकाचारविषयकानि विविधानि तथ्यानि समुल्लिखितानि। एतदुपलक्ष्य आलिम्पनचित्रणस्य अपूपनिर्माणस्यापि प्रचलनमासीत्। चतुष्कालंकरणमण्डितायां वेदिकायां कुम्भजलधारया दमयन्तीं स्नापयित्वा आलिजनास्तां विविधालंकारैः मण्डयामासुः। तद् यथा इन्दुशुभ्रवस्त्रेण तस्याः लावण्यमयं वपुः, मनःशिलाचित्रकेन भालम्, मूर्धजबन्धनेन केशपाशं, नीलपद्मकुण्डलाभ्यां कर्णयुगलम्, अञ्जनरेखया नेत्रद्वयम्, अलक्तरागेण पदयुगलं, मधुमिश्रितयावकदीप्त्या अधरोष्ठं, शङ्खवलयेन करकमलं, सप्तमुक्ताहारेण गलदेशमलञ्चक्रुः। नलोऽपि मस्तके मुकुटम्, भाले वीरपट्टिका, वक्षे चन्दनविन्दुः, कर्णद्वये कुण्डलमित्यादिभिः वरवेशैः सुशोभित आसीत्। नलस्य मणिबन्धे माङ्गलिकं विवाहसूत्रं निहितम्। विवाहकाले मधुपर्कास्वादनम्, बधुबरहस्ते कुशबन्धनम्, वरस्य पाणौ कन्यायाः हस्तार्पणम्, बरस्य अग्निप्रदक्षिणम्, 'स्थिरा त्वमश्मेव भव' इति मन्त्रोच्चारणम्, प्रियांशुकेन प्रियवाससो ग्रन्थिनिबन्धनम्, वरेण बधूमुद्दिश्य ध्रुवनक्षत्रप्रदर्शनम्, तथा 'सतीमिमां पश्य' इति वाक्येन अरुन्धतीप्रदर्शनम्, अग्नौ लाजोत्सर्ग इत्यादय आचाराः समनुष्ठिताः। एतैरनुमीयते यत् साधारणेषु जनेष्वपि एते लौकिकाचारा विशेषेण प्रचलिता आसन्। विवाहानुष्ठानादनन्तरं बधूपुरःसरो बरो निर्जनं कौतुकागारं प्राविशत्। तत्र कौतुकागारे "पुरन्ध्रिभिः सहस्ररन्ध्रीकृतमीक्षितुं ततः।" यथाविधि त्र्यहमेकत्रावस्थानेऽपि नवदम्पत्योः यौनसम्भोगो निषिद्ध आसीत्। समीरीतञ्च—

तथाशनाया निरशेषि न ह्रिया
न सम्यगालोकि परस्परक्रिया।
विमुक्तसम्भोगमशायि सस्पृहं
बरेण बध्वा च यथाविधि त्र्यहम् ॥ नै. च. १६/४७ ॥

देशे देशे काले काले मानवानां मनसि केचन संस्काराः परिलक्ष्यन्ते। सभ्यतायाः क्रमविकाशे शिक्षायाः सम्प्रसारे च तेषां लोकविश्वासानामपि विवर्तनं संघटितं भवति। नैषधचरितोपवर्णितायां समाजव्यवस्थायामपि तादृशा लोकाचारास्तथा संस्काराः प्रचलिता दृश्यन्ते। गोमयलिप्तेन चूर्णा-

दिच्छिन्न शरावेण दृष्टिदोषनिरासार्थं नीराजना क्रियते स्म (२/२६)। मन्त्रौषधिमणिप्रभावेन दुरारोग्यो व्याधिरपि दूरीभवतीति विश्वासो लोकेषु सुदृढ़मूल आसीत् (२२/६६)। दुष्टग्रहोपशमाय पक्वं महाकालफलं द्वारदेशेऽवध्यत। टीकाकारेण नारायणेन उक्तम्—"...महाकालफलं ग्रहोपसर्गनिवारणार्थं गृहद्वारे वृद्धैर्बध्यते।" मुखावयवेन पितुरनुकारिणी बाला सौभाग्यशालिनीति मन्यते स्म। दमयन्त्यपि पितृमुखीति कथ्यते (१३/१२)। नारीणां सीमन्ते सिन्दूरचिह्नं तासां प्रियायुषे कल्पते (१५/५५)। महाजनाचारमनुसृत्य साधवो न कदापि आत्मनाम आददते स्म—"स्वनाम नामाददते न साधवः" (६/१३)। तदानीं समाजे सहमरणप्रथायाः प्रचलनमासीत्। देशान्तरे मृतानां क्षत्रियाणां स्त्रियो धनुरालिङ्ग्यान्वम्रियन्त। अस्य सतीप्रतस्योल्लेखो नैषधचरितस्य ४/४६ संख्यके १६/४४ संख्यके च श्लोके समुपलभ्यते। प्रत्यादित्यं प्रतिबुधं वा गमनं जनानामहितकारकमिति निषिद्धमासीत्। पान्थैः प्रायेण तेषां गमनकाले कतिपया अशुभदिवसास्तिथयश्च परिहृताः। अशुभे दिवसे अशुभायां च तिथौ आरब्धयात्रः पथिको न स्वगृहं प्रत्यायाति इत्यासीत् जनानां विश्वासः (८/८०)। टीकाकारेण पण्डितशिवदत्तेन चित्रास्वातिनक्षत्रयोः अकल्याणकरत्वमुक्तम्—"नन्दन्ति न निवर्तन्ते चित्रास्वात्योर्गता नराः।" कुत्रापि यात्राकाले जलपूर्णकलसदर्शनं मङ्गलसूचकमित्यमन्यन्त जनाः (७/६५)। आम्र-करिशावक-राजहंसादीनां दर्शनमपि सौभाग्यं साफल्यञ्च सूचयतीति द्वितीयसर्गान्तर्गते सप्तषष्टितमे श्लोके तथा तृतीयसर्गस्थिते नवमे श्लोके च स्पष्टम्। भाग्यमनुकूलयितुं प्रायेण नराः दर्पण-कमल-मधु-किशलयादीनि धारयन्ति स्म। लाजवर्षणमपि शुभफलं प्रसूते (१५/७५-७६)। यात्रारम्भे पुण्यवतां नामोच्चारणेन सर्वार्थसिद्धिर्भवतीति विश्वासो जनमानसे सुबद्धमूल एवासीत्। तथोक्तं श्रीहर्षेण—

> प्रवसते भरतार्जुनवैन्यवत्
>
> स्मृतिधृतोऽपि नल ! त्वमभीष्टदः।
>
> स्वगमनाफलतां यदि शङ्कसे
>
> तदफलं निखिलं खलु मङ्गलम् ॥ नै. च. ५/१३४ ॥

नैषधीयश्लोकस्यास्य व्याख्यानावसरे टीकाकारेण शिवदत्तेनापि उक्तम्—

"वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च।
एतान् नृपान् यः स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्च ॥"

निशान्ते दृष्टः स्वप्न आशुभाविफलं प्रसूते (७/४२) इति विश्वासोऽपि जनानां मनसि बद्धमूल आसीत्।

जन्मान्तरवादे जनानां विश्वास आसीदिति नैषधचरिते बहुत्र प्रतीयते। इहजीवने कस्यापि सौभाग्यं जन्मान्तरीणस्य तपसः फलमेवेति मन्यते स्म। दमयन्त्या नललाभरूपं सौभाग्यमपि तस्या तपःफलत्वेनाभिहितम्—"तपः-फलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते (६/६३)।" मृत्युकाले एकचित्ततया यमेव प्राणिनं व्यक्तिविशेषं वा मानवाः स्मरन्ति जन्मान्तरे तद्रूपेणैव जायन्ते। तथाहि नलगतप्राणा दमयन्ती नलमुद्दिश्य उवाच—"त्वदेकचित्ताहमसून् विमुञ्चती त्वमेव भूत्वा तृणवज्जयामि तम्" (६/१४७)। परलोकेऽपि जनानां सुमहान् विश्वास आसीत्। मानवहिताय व्ययितं वित्तं परलोके प्रत्यायातीति प्रतीतिरत्रोल्लिखिता—"इहैकमप्राहि कोटिगुणितं दिवि दायि" (५/६२)। रणक्षेत्रे वीरोचितमरणमालिङ्ग्य योद्धारः स्वर्लोकं प्रयान्ति इत्यस्य महाकाव्यस्य द्वादशसर्गान्तर्गतेषु २६-७१-६८-संख्यकेषु श्लोकेषु समुपलभ्यते। धार्मिकाणां स्वर्गप्राप्तिरिव पापिनामपि नरकवासो भवतीति विश्वासो जनचित्ते दृढमूल आसीत् (१७/११०)। प्रेतयोनावपि विश्वसन्ति स्म जनाः। प्रेतात्मानो मानवशरीरं प्रविश्य तान् हतबुद्धयो विदधति (४/५५)। पापवशादेव पिशाचस्वभावः प्राप्यते। भुवनमोहनजनितेन पाप्मना मदनः पिशाचत्वमवाप्य इतस्ततः परिभ्रमतीति दमयन्तीवाक्येन सुस्पष्टम्—

"भुवनमोहनजेन किमेनसा
तव परेत! बभूव पिशाचता।
यदधुना विरहाधिमलीमसा-
मभिभवन् भ्रमसि स्मर मद्विधाम् ॥ नै. च. ४/८३ ॥

अथर्ववेदप्रतिपादितायाः अभिचारक्रियायाः समुल्लेखोऽपि नैषधचरितस्य दशमसर्गान्तर्गते पञ्चसप्ततितमे श्लोके उपलभ्यते। मासस्य अष्टमी चतुर्दशी चेति तिथिद्वयं क्रियाविशेषसिद्ध्यनुकूलत्वेन विहितमासीत्। तथा हि सप्तमे सर्गे दमयन्ती अष्टमीतिथिरूपेणाभिहिता। अस्यामेव पवित्रतिथौ तामेव दमयन्तीमवलम्ब्य "जगज्जयाय मनोभुवा सिद्धिरसाधि साधु"। अपि चोक्तम्—

अरुन्धतीकामपुरन्ध्रीलक्ष्मीजम्भद्विषद्दारणवाम्बिकानाम् ।
चतुर्दशीयं तदिहोचितैव गुल्फद्वयाप्ता यदद्दृश्यसिद्धिः ।। नै. च. ७/६८।।

आकर्षणसिद्धेस्तथा (१०/६२) यथेच्छमाकारग्रहणस्य (१४/६४) एवमादिकाया अलौकिकशक्तेरुल्लेखः काव्येऽस्मिन् समुपलभ्यते। तदानीन्तने समाजे ओषधिबलेन (११/६६) तथा प्रवालादिरत्नेन (११/१०४) वशीकरणस्य रीतिरपि प्रचलितासीत्।

शिक्षा-शिल्प-स्थापत्य-भास्कर्यादिषु भारतवर्षस्य ऐतिह्यं गौरवावहम्। महाकवेः श्रीहर्षस्य कालेऽपि एतेषु भारतभूमिरस्माकं गौरवपदवीमारूढ़वती। न केवलं पुरुषाणां नारीणामपि मध्ये शिक्षायाः सुमहान् प्रसार आसीत्। विदुषी दमयन्ती 'श्लेषकवि'रूपेण प्रस्तुता राजहंसेन। तस्याः सखीजनाना-मपि वाचि विदग्धता सर्वेषां विस्मयमावहति। पत्ररचनायामपि तासां पटुत्व-मुल्लिखितं षष्ठसर्गे यत्र "स्वमनङ्गलेखं निलेख भैमी।" न केवलं पठने लेखने च नारीणां शिक्षा सीमिता, विवधकलास्वपि तासां निष्णातता तथा पाण्डित्य-बलेन परमतखण्डनेऽपि तासां निपुणतासीत् (६/१०८)। सत्यपि वेदानां पाठप्रचलने वेदपाठे तच्छ्रवणे च शूद्राणां नासीदधिकारः। प्रत्यहं प्रातरेव यथाविहितस्वरक्रमेण वेदानां पाठकालः सुनिर्दिष्टः। मासस्य शुक्लप्रतिपत्तिथिः अनध्यायकालरूपेणोल्लिखिता (११/६२)। धनुर्विद्यायाः शिक्षा साधारण्ये विशेषतस्तु क्षत्रियाणां मध्ये प्रचलितासीत्। सङ्गीतविद्यायाः प्रसारोऽपि बहुत्र उल्लिखितः। आलिङ्ग्य-काहलोध्वर्क-परिवादिनी-विपञ्ची-झर्झर-मर्दल-ढक्का-वेणु-तुर्य्यादीनां वाद्ययन्त्रविशेषाणां समुल्लेखः सङ्गीतविद्याचर्चायाः समुन्नतिं प्रख्यापयति। श्रीहर्षेण विद्येयं गन्धर्वविद्यारूपेणोपवर्णिता (१०/७४)। कविना ७/१०७ संख्यके श्लोके चतुःषष्टिप्रकाराणां कलानां समुल्लेखो विहितः। बहुत्र चित्रकर्मणः आलिम्पनकरणस्य चोल्लेखः परिलक्ष्यते। नार्य्यस्तु विषये-ऽस्मिन् नैपुण्यमवगाहन्ते स्म। चित्रकर्मणि चित्रशिल्पिभिः प्रायेण कृष्ण-शुभ्र-हरित-कपिश-रक्तादीनि वर्णानि व्यवहृतानि।

नलराजधान्यां धर्मप्राणमानवानां वेदविहितधर्मानुष्ठानस्य मनोज्ञं चित्र-कल्पमुपस्थापितं कविना। नित्यनैमित्तिककर्मभेदेन धर्मीयानुष्ठानानां द्वैविध्यं सम्प्रदायसिद्धम्। तत्र सन्ध्यावन्दनादीनि नित्यकर्मरूपेण व्रतोपवासादीनि च नैमित्तिककर्मरूपेण परिगण्यन्ते। द्विजैः नियमेन नित्यकर्मानुष्ठानमक्रियत।

सूर्यमुद्दिश्य मन्त्रजपकाले रक्तचन्दनबीजमालिकायाः (२१/३३), शिवमुद्दिश्य शतरुद्रीयमन्त्रोच्चारणकाले रुद्राक्षमालिकायाः (२१|४०) व्यवहार आसीत्। साग्निकानां विप्राणां त्रिकालयज्ञ आवश्यिककर्मरूपेण व्यवस्थितः। पितृतर्पणे कृष्णतिलस्य व्यवहारः (१७/१५६), स्नानादनन्तरं तिलकधारणम् (१७/१७०), मासमुपवासः (१७/१७३), यज्ञे पशुबधः (१७/१७२) इत्यादीनि निषध-राज्ये प्रचलितान्यासन्। तदानीन्तने समाजे विष्णु-सूर्य-शिवादीनां मूर्ति-पूजाप्रचलितासीत्। अश्वमेध-गोमेध-सौत्रामणि-राजसूय-दर्शपूर्णमासयागानां नितरामुल्लेखः समाजे यागप्राधान्यं प्रख्यापयति। वेदविहितधर्मस्य प्राधान्ये-ऽपि समाजे वेदविरोधिनां बौद्धजैनादीनां धर्माणामपि अवस्थितिरासीत्।

नागरिका अतिथिवत्सला आसन्। गृहिणः प्रणिपातेन सम्भ्रमं प्रदर्श्य पादोदकेन पादौ प्रक्षाल्य मधुपर्कदानेन अतिथीनां यथोचितां तृप्तिं सम्पादित-वन्तः। समीरीतञ्च—

नत्वा शिरोरत्नरुचापि पाद्यं
सम्पाद्यमाचारविदातिथिभ्यः।
प्रियाक्षरालीरसधारयापि
वैधी विधेया मधुपर्कतृप्तिः ॥ नै. च. ८/२० ॥

अपि च गृहिणः अखण्डिततण्डुलैः दूर्वातृणैश्च अतिथीन् सन्तोष्य खाद्यरूपेण तेभ्यः जलसम्पृक्तं सक्तुं न्यवेदयन्। तथा चोक्तं नैषधकाव्ये—

प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशवलीकृतैः।
अथ रविरुचां प्रासातिथ्यं नभः स्वविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥ नै. च. १९/१४॥

गृहे अतिथेरनागमनमात्मदौर्भाग्यमिति अमन्यन्त जनाः।

नैषधचरितोपवर्णिते समाजे धनिनां प्राधान्येऽपि निर्धनानामवस्थिति-रासीत्। विदर्भराजकन्यायाः विवाहोत्सवे साधारणप्रजाः निमन्त्रिताः न वेति कविना नोल्लिखितं किन्तु आपणात् सक्तुलाभेन तासां सरला जीवनयात्रा आनन्देन निर्वाहिताभवदिति सुस्पष्टमुक्तम्। समाजे मुद्रारूपेण वराटिकायाः प्रचलनमासीत्। तथा च द्वितीये सर्गे वराटिकागणनातत्पराणां वणिजा-मुल्लेखो नो नयनपथं पन्थायते—

"बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ।। नै. च. २/८८ ।।

स्वर्णमुद्रा रौप्यमुद्रा चापि क्रयविक्रयमाध्यमरूपेण परिगणिते आस्ताम् । कूटरजतं स्वर्णमुद्राव्याजेन प्रत्यर्प्य भण्डैः प्रायेन नारिकाः प्रतारिताः (२२/५५)। शोचनीयासीदधमर्णानामवस्था। उत्तमर्णानामनुग्रहभाजनास्ते प्रायेण पदे पदे तैः प्रतारिता अभवन्निति दृश्यते। कुसीदजीविभिरपि ते प्रतार्य्यन्ते स्म। अभिजातानां स्वर्णालंकार इव दरिद्राणां मध्ये आरकूटाभरणस्यापि प्रचलनमासीत्।